# ॥ वेद सूक्तम् ॥

१ गणपत्यथर्वशिर्षोपनिषत्

२ सुब्रह्मण्य मन्त्राः

३ ऋषभ सूक्तम्

४ लघु न्यासः

५ रुद्र प्रश्नम् नमकम् अन्द् चमकम्

६ पुरुष सूक्तम्

७ नारयण सूक्तम्

८ विष्णु सूक्तम्

९ श्री सूक्तम्

१० भू सूक्तम्

११ नीळा सूक्तम्

१२ दुर्गा सूक्तम्

१३ देवी सूक्तम्

१४ सरस्वती सूक्तम्

१५ मेधा सूक्तम्

१६ रात्रि सूक्तम्

१७ भाग्य सूक्तम् मोर्निन्ग् मन्त्रस्

१८ आयुष्य सूक्तम्

१९ हिरण्य गर्भ सूक्तम्
२० वास्तु सूक्तम्
२१ कुम्भ मन्त्राः
२२ आप मन्त्राः
२३ पवमान सूक्तम् (पुण्याहवाचनम्)
२४ कपोत सूक्तम्
२५ दश दिक्पालका सूक्तम्
२६ नवग्रह सूक्तम्
२७ नक्षत्र सूक्तम्
२८ नासदासीय सूक्तम्
२९ अग्नि सूक्तम्
३० पृथिवी सूक्तम्
३१ ओषधि सूक्तम्
३२ पितृ सूक्तम्
३३ मृत्तिक सूक्तम्
३४ गो सूक्तम्
३५ श्रद्धा सूक्तम्
३६ विवाह सूक्तम्
३७ शिव सङ्कल्पाः

३८ भद्र सूक्तम्

३९ ब्रम सूक्तम्

४० मन्त्र पुष्पम्

४१ संन्यासि सूक्तम्

४२ चतुर् वेद परायणम्

४३ आशीर्वाद मन्त्राः

४४ शिवोपासन मन्त्राः

४५ सर्प सूक्तम्

४६ पञ्चामृत मन्त्राः

४७ पञ्चगव्य मन्त्राः

४८ मधु सूक्तम्

४९ ज्ञान सूक्तम्

५० नेत्रोन्मीलनम् मन्त्राः

५१ रक्षघ्न सूक्तम्

५२ अघमर्षण सूक्तम्

५३ दुर्वा सूक्तम्

५४ पञ्च शान्तायः

१ गणपत्यथर्वशिर्षोपनिषत्

ॐ ॐ ॐ

॥ अथ श्री गणपत्य्-अथर्वशिर्ष्-ओपनिषत् ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः ।
भद्रं पश्येमाक्ष-भिर्यजत्राः ॥
स्थिरैरङ्गै-स्तुष्टुवाँ-सस्तनूभिः ।
व्यश्येम देवहितं यदायुः ॥
स्वस्ति न इन्द्रो वृद्ध-श्रवाः ।
स्वस्ति नः पूषा विश्व-वेदाः ॥
स्वस्ति नस्ताक्ष्र्यो अरिष्ट-नेमिः ।
स्वस्ति नो बृहस्पतिर्-दधातु ॥
ॐ शान्ति श्शान्ति श्शान्तिः ।

आं ग्लौं ॥

नमस्ते गणपतये । त्वमेव प्रत्यक्षं तत्वमसि । त्वमेव केवलं कर्तासि । त्वमेव केवलं धर्तासि । त्वमेव केवलं हर्तासि । त्वमेव सर्वं खल्विदं ब्रह्मासि । त्वं साक्षात्-दात्माऽसि नित्यम् ॥ १ ॥

ऋतं वच्मि । सत्यं वच्मि ॥ २ ॥

अव त्वं माम् । अव वक्तारम् । अव श्रोतारम् । अव दातारम् । अव धातारम् । अवा-नूचानम्-अव शिष्यम् । अव पश्चात्तात् । अव पुरस्तात् । अवो-त्तरात्तात् । अव दक्षिणात्तात् । अव चोर्ध्वात्तात् । अवा-धरात्तात् । सर्वतो मां पाहि पाहि समन्तात् ॥ ३ ॥

त्वं वङ्-मयस्त्वं चिन्मयः। त्वं-आनन्द-मयस्त्वं ब्रह्ममयः। त्वं सच्चिदानन्दाऽद्वितीयोऽसि। त्वं प्रत्यक्षं ब्रह्मासि। त्वं ज्ञानमयो विज्ञान-मयोऽसि॥ ४॥

सर्वं जग-दिदं त्वत्तो जायते। सर्वं जग-दिदं त्वत्त-स्तिष्ठति। सर्वं जग-दिदं त्वयि लय-मेष्यति। सर्वं जग-दिदं त्वयि प्रत्येति।

त्वं भूमिरापोऽनलोऽनिलो नभः। त्वं चत्वारि वाक्-पदानि॥ ५॥

त्वं गुण-त्रयातीतः। त्वं अवस्था-त्रयातीतः। त्वं देह-त्रयातीतः। त्वं काल-त्रयातीतः। त्वं मुलाधार-स्थितोऽसि नित्यम्। त्वं शक्ति-त्रयात्-मकः। त्वां योगिनो ध्यायन्ति नित्यम्। त्वं ब्रह्म त्वं विष्णु-स्त्वं रुद्रस्त्वम्-इन्द्रस्त्वम्-अग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमा-स्त्वं ब्रह्म भूर्-भुवः सुवरोम्॥ ६॥

गणादिं पूर्व-मुच्चार्य वर्णादीं स्तदनन्-तरम्। अनुस्वारः परतरः। अर्धेन्-दुलसितम्। तारेण ऋद्धम्। एतत्तव मनु-स्वरूपम्। गकारः पूर्व-रूपम्। अकारो मध्य-मरूपम्। अनु-स्वारश्-चान्-त्यरूपम्। बिन्दु-रुत्तर-रूपम्। नादः सन्धानम्। सँहिता सन्धिः। सैषा गणेश-विद्या। गणक ऋषिः। निचृद्-गायत्रि-च्छन्दः। श्री महा-गणपतिर्-देवता। ॐ गं गणपतये नमः॥ ७॥

एकदन्ताय विद्महे वक्रतुण्डाय धीमहि।
तन्नो दन्तिः प्रचोदयात्॥ ८॥

एकदन्तं चतुर्-हस्तं पाशामङ्-कुश-धारिणम्। रदं च वरदं हस्तैर्-बिभ्राणं मूषक-ध्वजं। रक्तं लम्बोदरं शूर्प-कर्णकं रक्त-वाससम्। रक्त-गन्धनु-लिप्ताङ्गं

रक्त-पुष्पैः सुपूजितं। भक्ता-नुकम्-पिनं देवं जगत्-कारण-मच्युतम्। आविर्-भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्-परम्। एवं ध्यायति यो नित्यं स योगी योगिनां वरः॥ ९॥

नमो व्रातपतये। नमो गणपतये। नमः प्रमथ-पतये। नमस्ते अस्तु लम्बोदराय एकदन्ताय विघ्नविना-शिने शिवसुताय श्री-वरद-मूर्तये नमो नमः॥ १०॥

एतद्-अथर्वशिर्षं योऽदीते स ब्रह्म-भूयाय कल्पते। स सर्व-विघ्नैर्न बाध्यते। स सर्वत्र सुख-मेधते। स पञ्च-महापापात् प्रमुच्यते। सायम-धीयानो दिवस-कृतं पापं नाशयति। प्रातर-धीयानो रात्रि-कृतं पापं नाशयति। सायं प्रातः प्रयुञ्जानो पापो-ऽपापो भवति। सर्वत्रा-धीयनोऽपविघ्नो भवति। धर्मार्थ-काम-मोक्षं च विन्दति। इदम्-अथर्व-शीर्षम्-अशिष्या-य न देयम्। यो यदि मोहाद् दास्यति स पापीयान् भवति। सहस्रा-वर्तनाद्-यं यं काम-मधीते तं तमनेन साधयेत्॥ ११॥

अनेन गणपतिम-भिषिञ्चति स वाग्मि भवति। चतुर्थ्या-मनश्नन् जपति स विद्यावान् भवति। इत्यथर्-वण-वाक्यम्। ब्रह्माद्या-वरणं विद्यान्न बिभेति कदा-चनेति॥ १२॥

यो दुर्वाङ्-कुरैर्-यजति स वैश्रव-णोपमो भवति। यो लाजैर्-यजति स यशोवान् भवति। स मेधावान् भवति। यो मोदक-सहस्रेण यजति स वाञ्छित-फलम्-अवाप्नोति। यः साज्य समिद्-भिर्यजति स सर्वं लभते स सर्वं लभते॥ १३॥

अष्टौ ब्रह्मणान् सम्यग् ग्राहयित्वा सूर्य-वर्चस्वी भवति। सूर्यग्रहे महा-नद्यां प्रतिमा-सन्निधौ वा जप्त्वा सिद्ध-मन्त्रो भवति। महा-विघ्नात् प्रमुच्यते। महा-

दोषात् प्रमुच्यते । महा-पापात् प्रमुच्यते । महा-प्रत्यवायात् प्रमुच्यते । स सर्वविद्-भवति स सर्वविद्-भवति । य एवं वेद । इत्य्-उपनिषत् ॥ १४ ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः - ।
भद्रं पश्येमाक्ष-भिर्यजत्राः - ॥
स्थिरैरङ्गै-स्तुष्टुवाँ-सस्तनूभिः ।
व्यश्येम देवहितं यदायुः ॥
स्वस्ति न इन्द्रो वृद्ध-श्रवाः - ।
स्वस्ति नः पूषा विश्व-वेदाः - ॥
स्वस्ति नस्ताक्ष्र्यो अरिष्ट-नेमिः ।
स्वस्ति नो बृहस्पतिर्-दधातु ॥
ॐ शान्ति श्शान्ति श्शान्तिः । ॐ ॥

## २ सुब्रह्मण्य मन्त्राः

॥ सुब्रह्मण्यमन्त्रः ॥

निर्घृष्-वैर समायुतैः - ।
कालैर्-हरित्व-मापन्नैः - ।
इन्द्रायाहि सहस्रयुक् ।
अग्निर्-विभ्राष्टि-वसनः ।
वायु श्श्वेत-सिकद्रुकः ।
संवथ्सरो विषू-वर्णैः ।

नित्या-स्तेऽनु-चरास्तव ।

सुब्रह्मण्योग्ं सुब्रह्मण्योग्ं सुब्रह्मण्यों ॥

जगद्-भुवं बहुतो हुतं यजत्-भुवं नमस्ते अस्तु ।

विश्व-भुवे जगत् भुवो-धिपतिः सेनानी मयूरो-प्रिय ष्षढाननां गारः ॥

संजया-हनमस्ते अस्तु सुखा-वहाय ।

सुब्रह्मण्यो बृहस्पते सुतायास्य पद्मयोनेः ।

यस्यात्मा व हने वहति ॥

अयं कुमारो जरां धयतु दीर्घमायुः ।

यस्मै त्वग्ं स्तन प्राप्या-यायुर्-वर्चो यशो बलग्ं स्वाहा ।

सखाय स्सप्तपदा अभूम । सख्यं ते गमेयम् । सख्यात्ते मा योषम् । सख्यान् मे मा योष्ठाः । साऽसि सुब्रह्मण्ये । तस्यास्ते पृथिवी पादः । साऽसि सुब्रह्मण्ये । तस्यास्ते ऽन्तरीक्षं पादः । साऽसि सुब्रह्मण्ये । तस्यास्ते द्यौः पादः । साऽसि सुब्रह्मण्ये । तस्यास्ते दिशः पादः । परोर्-अजास्ते पञ्चमः पादः । सा न इष-मूर्जधुक्ष्व तेज इन्द्रयम् । ब्रह्मवर्चस मन्नाद्यम् । विमिमे त्वा पयस्वतीम् । देवनां धेनुं सुदुघा-मनपस्फुरन्तीम् । इन्द्र स्सोमं पिबतु क्षेमो अस्तु नः ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

३ ऋषभ सूक्तम्

ऋषभं मा समानानां सपत्नानां विषासहिम् ।

ःअतारं शत्रुणां कृधि विराजं गोपतिं गवाम् ॥

अहम्-अस्मि सपत्-नहेद्र इवारिष्टो अक्षतः ।
अधः सपत्ना मे पदोर् इमे सर्वे अभिष्ठिताः - ॥
अत्रैव वोऽपि नह्या-म्युभे आर्त्नी इव ज्यया ।
वाचस्पते नि षेधेमान् यथा मदधरं वदान् . ॥
अभिभूर-हमागमं विश्व-कर्मेण धाम्ना ।
आ वश्चि-त्तमा वो व्रतमा वोऽहं समितिं ददे ॥
योगक्षेमं व आदायाहं भूयासयु-त्तम आवो मूर्धान-मक्रमीम् ।
अधस्पदान्म उद्वदत मण्डूका इवोदकान्-मण्डूका उदका-दिव ॥
तत्-वृषभाय विद्महे शिव-भाक्ताय धीमहि ।
तन्नो नन्दिः प्रचोदयात् . ॥
ॐ शान्ति श्शान्ति श्शान्तिः ॥

४ लघु न्यासाः

॥ लघु न्यासः ॥

ॐ अथात्मानं शिवात्मानग्ग् श्रीरुद्ररूपं ध्यायेत् ॥
शुद्ध-स्फटिक-सङ्काशं त्रिनेत्रं पञ्च-वक्रकम् ।
गङ्गाधरं दशभुजं सर्वभरण-भूषितम् ॥
नीलाग्रीवं शशाङ्काङ्कं नाग-यज्ञो-पवीतिनम् ।
व्याघ्र-चर्मोत्तरीयं च वरेण्यम्-अभयम्-प्रदम् ॥
कमण्डल्-वक्ष-सूत्राणां धारिणं शूलपाणिनम् ।

ज्वलन्तं पिङ्गलाजटा-शिखामुद्योत-धारिणम्॥

वृषस्कन्ध-समारूढं उमादेहार्ध धारिणम्।

अमृतेना-प्लुतं शान्तं दिव्यभोग-समन्वितम्॥

दिग्देवता-समायुक्तं सुरासुर-नमस्कृतम्।

नित्यं च शाश्वतं शुद्धं ध्रुवम्-अक्षरम्-अव्ययम्॥

सर्व-व्यापिनम्-ईशानं रुद्रं वै विश्वरूपिणम्।

एवं ध्यात्वा द्विज स्सम्यक् ततो यजन-मारभेत्॥

अथातो रुद्र-स्नान्-आर्चन्-आभिषेक-विधिं व्याख्यास्यामः।

आदित एव तीर्थे स्नात्वा उदेत्य शुचिः प्रयतो

ब्रह्मचारी शुक्लवासा देवाभिमुखः

स्थित्वा आत्मनि देवताः स्थापयेत्॥

प्रजनने ब्रह्मा तिष्ठतु।

पादयोर्-विश्णु स्तिष्ठतु।

हस्तयोर्-हर स्तिष्ठतु।

बाह्वोर्-इन्द्र स्तिष्ठतु।

जठरेऽग्नि स्तिष्ठतु।

हृदये शिव स्तिष्ठतु।

कन्ठे वसव स्तिष्ठन्तु।

वक्त्रे सरस्वती तिश्ठतु।

नासिकयोर्-वायु स्तिष्ठतु ।

नयनयोश्-चन्द्रादित्यौ तिष्ठेताम् ।

कर्णयोर्-अश्विनौ तिष्ठेताम् ।

ललाटे रुद्रा स्तिष्ठन्तु ।

मूर्ध्न्यादित्या स्तिष्ठन्तु ।

शिरसि महादेव स्तिष्ठतु ।

शिखायाम् वामदेव स्तिष्ठतु ।

पृष्ठे पिनाकी तिष्ठतु ।

पुरतः शूली तिष्ठतु ।

पार्श्वयोः शिवा-शन्करौ तिष्ठेताम् ।

सर्वतो वायु स्तिष्ठतु ।

ततो बहिः सर्वतोऽग्निर्-ज्वाला-माला परिवृत स्तिष्ठतु ।

सर्वे-ष्वङ्गेषु सर्वा देवता यथा-स्थानं तिष्ठन्तु ।

माग्ं रक्षन्तु ॥

अग्निर्मे वाचि श्रितः वाग्धृदये । हृईदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

वायुर्मे प्राणे श्रितः । प्राणो हृदये ई हृईदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

सूर्यो मे चक्षुषि श्रितः । चक्षुर्-हृदये । हृईदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

चन्द्रमा मे मनसि श्रितः । मनो हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

दिशो मे श्रोत्रे श्रिताः - । श्रोत्रग्ं हृदये । हृदयं मयि । अहममृते । अमृतं ब्रह्मणि ।

आपो मे रेतसि श्रिताः –। रेतो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

पृथिवी मे शरीरे श्रिताः –। शरीरग्ं हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

ओषधि-वनस्पतयो मे लोमसु श्रिताः –। लोमानि हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

इन्द्रो मे बले श्रितः। बलग्ं हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

पर्जन्यो मे मूर्ध्नि श्रितः। मूर्धा हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

ईशानो मे मन्यौ श्रितः। मन्युर्-हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

आत्मा म आत्मनि श्रितः। आत्मा हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि।

पुनर्म आत्मा पुनरायु-रागात्।

पुनः प्राणः पुनराकू-तमागात् ई

वैश्वानरो रश्मिभिर्-वावृधानः ई

अन्त-स्तिष्ठ-त्वमृतस्य गोपाः –॥

॥ गणपति प्रर्थानम्॥

ॐ गणानाम् त्वा गणपतिँ हवामहे कविं कवीनाम्-उपमश्र-वस्तमम्।

ज्येष्ठ-राजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्-नूथिभिस्-सीध सादनम्।

ॐ श्री महा-गणपतये नमः॥

॥ विनियोगः॥

ॐ अस्य श्री रुध्रा-ध्याय-प्रश्न-महा-मन्त्रस्य। अघोर ऋषिः।
अनुष्टुप्-छन्दः। सङ्कर्षण-मूर्ति-स्वरूपो योऽसा-वादित्यः परम-पुरुषः स एष रुद्रो देवता। नमः शिवा-येति बीजम्। शिवतरा-येति शक्तिः। महादेवा-येति कीलकम्। श्री-पर-मेश्वर-प्रसाद-सिद्ध्यर्थे। श्रीरुद्र जपे विनियोगः॥

॥ नास्य॥

अग्नि-होत्रात्-मने अङ्गुष्-ठाभ्यां नमः।

दर्श-पूर्ण-मासात्-मने तर्ज-नीभ्यां नमः।

चातुर्-मास्-यात्मने मध्य-माभ्यां नमः।

निरूढ-पशु-बन्धात्-मने अनामि-काभ्यां नमः।

ज्योतिष्तो-मात्मने कनिष्टि-काभ्यां नमः।

सर्व-क्रत्वात्-मने कर-तल-कर-पृष्ठाभ्यां नमः।

अग्नि-होत्रात्-मने हृदयाय नमः।

दर्श-पूर्ण-मासात्-मने शिरसे स्वाहा।

चातुर्-मास्-यात्मने शिखायै वषट्।

निरूढ-पशु-बन्धात्-मने कवचाय हुं।

ज्योतिष्ठो-मात्मने नेत्र-त्रयाय वौषट्।

सर्व-क्रत्वात्-मने अस्त्राय फट्।

भूर्-भुवस्-सुवरों-इति दिग्बन्धः॥

॥ ध्यानम्॥

आपाताल-नभः स्थलान्त-भुवन-ब्रह्माण्ड-मावि-स्फुरत्-

ज्ज्योतिः स्फाटिक-लिङ्ग-मौलि-विलसत् पूर्णेन्-दु-वान्ता-मृतैः। अस्तोका-

प्लुतमेक-मीश-मनिशं रुद्रानु-वाका-ञ्जपन्

ध्याये-दीप्सित सिद्धयेऽ-द्रुतपदं विप्रोऽभि-षिञ्चेच्-छिवम्॥

ब्रह्माण्ड-व्याप्त-देहा भसित-हिमरुचा भास-माना भु-जङ्गैः

कण्ठे कालाः कपर्दा-कलित शशि-कलाश्-चण्ड-कोदण्ड-हस्ताः।

त्र्यक्शा रुद्राक्श-मालाः प्रणत-भय-हराः शांभवा मूर्ति-भेदाः

रुद्राः श्री-रुद्रसूक्त-प्रकटित-विभ-वा नः प्रयच्-छन्तु सौख्यम्॥

शं च॑ मे॒ मय॑श्च मे प्रि॒यं च॑ मेऽनुका॒मश्च॑ मे॒ काम॑श्च मे सौमन॒सश्च॑ मे भ॒द्रं च॑ मे॒ श्रेय॑श्च मे॒ वस्य॑श्च मे॒ यश॑श्च मे॒ भग॑श्च मे॒ द्रवि॑णं च मे य॒न्ता च मे ध॒र्ता च मे॒ क्शेम॑श्च मे॒ धृति॑श्च मे॒ विश्वं॑ च मे॒ मह॑श्च मे स॒ंविच्च॑ मे॒ ज्ञात्रं॑ च मे॒ सूश्च॑ मे प्र॒सूश्च॑ मे॒ सीरं॑ च मे ल॒यश्च॑ म ऋ॒तं च॑ मे॒ऽमृतं॑ च मेऽय॒क्श्मं च॒ मेऽनाम॑यच्च मे जी॒वातु॑श्च मे दीर्घायु॒त्वं च॑ मेऽनमि॒त्रं च॒ मेऽभ॑यं च मे सु॒गं च॑ मे॒ शय॑नं च मे सू॒षा च॑ मे सु॒दिनं॑ च मे॥

ॐ शान्तिः॒ शान्तिः॒ शान्ति॑ः॥

५ रुद्र प्रश्नम् नमकम् अन्द् चमकम्

॥ रुद्र नमकम्॥

ॐ नमो भगवते॑ रुद्राय॥

नम॑स्ते रुद्र म॒न्यव॑ उ॒तोत॒ इष॑वे॒ नम॑ः।

नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥

या त इषुः शिवतमा शिवम् बभूव ते धनुः ।

शिवा शरव्या या तव तया नो रुद्र मृडय ॥

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ।

तया नस्तनुवा शन्तमया गिरिशन्ता-भिचाकशीहि ॥

यामिषुं गिरिशंत हस्ते बिभर्-ष्यस्तवे ।

शिवां गिरित्र तां कुरु मा हिꣳसीः पुरुषं जगत् ॥

शिवेन वचसा त्वा गिरिशा-च्छावदामसि ।

यथा नः सर्वमि-ज्जगदय-क्ष्मꣳ सुमना असत् ॥

अध्यवो-चदधि-वक्ता प्रथमो दैव्यो भिषक् ।

अहीꣳश्च सर्वा-ञ्जम्भयन्त्-सर्वाश्च यातुधान्यः ॥

असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ।

ये चेमाꣳ रुद्रा अभितो दिक्षु श्रिताः सहस्रशोऽवैषाꣳ हेड ईमहे ॥

असौ योऽवसर्पति नीलग्रीवो विलोहितः ।

उतैनं गोपा अदृश-न्नदृश-न्नुदहार्यः ॥

उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ।

नमो अस्तु नीलग्री-वाय सहस्रा-क्षाय मीढुषे ॥

अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन् नमः ।

प्रमुञ्च धन्वन-स्त्व-मुभयो-रार्त्नियोर्ज्याम् ॥

याश्च ते हस्त इषवः परा ता भगवो वप ।
अवतत्य धनुस्त्वꣳ सहस्राक्श शतेषुधे ॥
निशीर्य शल्यानां मुखा शिवो नः सुमना भव ।
विज्यं धनुः कपर्दिनो विशल्यो बाणवाꣳ उत ॥
अनेश-न्नस्येषव आभुरस्य निषङ्गथिः ।
या ते हेतिर्मी-ढुष्टम हस्ते बभूव ते धनुः ॥
तयाऽस्मान् विश्वत-स्त्वमय-क्श्मया परिब्भुज ।
नमस्ते अस्त्वायु-धायाना-तताय धृष्णवे ॥
उभाभ्या-मुत ते नमो बाहुभ्याम् तव धन्वने ।
परि ते धन्वनो हेतिरस्मान्-वृणक्तु विश्वतः ॥
अथो य इषुधि-स्तवारे अस्मन्निधेहि तम् ।
शम्भवे नमः ॥
नमस्ते अस्तु भगवन्-विश्वेश्वराय महा-देवाय त्र्यम्-बकाय त्रिपुरान्-तकाय
त्रिकाग्नि-कालाय कालाग्नि-रुद्राय नील-कण्ठाय मृत्युङ्-जयाय सर्वे-श्वराय
सदा-शिवाय श्रीमन्-महा-देवाय नमः ॥१ ॥
नमो हिरण्य-बाहवे सेनान्ये दिशां च पतये नमो नमो वृक्शेभ्यो हरिकेशेभ्यः
पशूनां पतये नमो नमः सस्पिञ्-जराय त्विषीमते पथीनां पतये नमो नमो
बभ्लुशाय विव्याधिनेऽन्नानां पतये नमो नमो हरिकेश्यो-पवीतिने पुष्टाणं पतये नमो
नमो भवस्य

हेत्यै जगतां पतये नमो नमो रुद्राया-तताविने क्शेत्राणां पतये नमो नमः सूताया-
हन्त्याय वनानां पतये नमो नमो रोहिताय स्थपतये वृक्शाणं पतये नमो नमो
मन्त्रिणे वाणिजाय कक्षाणं पतये नमो नमो भुवंतये वारिवस्-कृधायौ-षधीनां पतये
नमो नम उच्चैर्-घोषाया-क्रन्दयते पत्तीनाम् पतये नमो नमः कृत्स्नवीताय धावते
सत्वनां पतये नमः ॥२॥

नमः सहमानाय निव्यादिन आव्या-धिनीनां पतये नमो नमः ककुभाय निषङ्गिणे
स्तेनानां पतये नमो नमो निषङ्गिण इषुधिमते तस्कराणां पतये नमो नमो वञ्चते
परिवञ्चते स्तायूनां पतये नमो नमो निचेरवे परिचराया-रण्यानां पतये नमो नमः
सृकाविभ्यो जिघाग्ंसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तं-चरद्भ्यः
प्रकृन्तानां पतये नमो नम उष्णीषिने गिरिचराय कुलुञ्चानां पतये नमो नम
इषुमद्भ्यो धन्वावि-भ्यश्च वो नमो नम आतन्वानेभ्य प्रतिदधाने-भ्यश्च वो नमो
नम आयच्छद्भ्यो विसृजद्-भ्यश्च वो नमो नमोऽस्यद्भ्यो विध्यद्-भ्यश्च वो नमो
नम आसीनेभ्यः शयाने-भ्यश्च वो नमो नमः स्वपद्भ्यो जाग्रद्-भ्यश्च वो नमो
नम-स्तिष्ठद्भ्यो धावद्-भ्यश्च वो नमो नमः सभाभ्यः सभापति-भ्यश्च वो नमो
नमो अश्वेभ्योऽश्वपति-भ्यश्च वो नमः ॥३॥

नम आव्यधिनीभ्यो विविध्यन्ती-भ्यश्च वो नमो नम उगणाभ्य-स्तृंहतीभ्यश्च वो
नमो नमो गृत्सेभ्यो गृत्सपति-भ्यश्च वो नमो नमो व्रातेभ्यो व्रातपति-भ्यश्च वो
नमो नमो गणेभ्यो गणपति-भ्यश्च वो नमो नमो विरूपेभ्यो विश्वरुपे-भ्यश्च वो
नमो नमो महद्भ्यः . क्शुल्लके-भ्यश्च वो नमो नमो रथिभ्योऽरथेभ्यश्च वो नमो

नमो रथेभ्यो रथपति-भ्यश्च वो नमो नमः सेनाभ्यः सेननि-भ्यश्च वो नमो नमः .
क्शत्तृभ्यः संग्रहीतृ-भ्यश्च वो नमो नमस्तक्शभ्यो रथकारे-भ्यश्च वो नमो नमः
कुलालेभ्यः कमारेभ्यश्च वो नमो नमः पुञ्जिष्टेभ्यो निषादे-भ्यश्च वो नमो नम
इषुकृद्भ्यो धन्वकृद्-भ्यश्च वो नमो नमो मृगयुभ्यः श्वनिभ्यश्च वो नमो नमः श्वभ्यः
श्वपति-भ्यश्च वो नमः ॥४ ॥

नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च
शितिकण्ठाय च नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्शाय च शतधन्वने
च नमो गिरिशाय च शिपिविष्टाय च नमो मीढुष्टमाय चेषुमते च
नमो ह्रस्वाय च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च संवृद्ध्वने च
नमो अग्रियाय च प्रथमाय च नम आशवे चाजिराय च नमः शीघ्रियाय च
शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमः स्रोतस्याय च द्वीप्याय च ॥५ ॥

नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजाय चापरजाय च नमो मध्यमाय
चापगल्भाय च नमो जघन्याय च बुध्नियाय च नमः सोभ्याय च प्रतिसर्याय च
नमो याम्याय च क्शेम्याय च नम उर्वर्याय च खल्याय च नमः श्लोक्याय
चाऽवसान्याय च नमो वन्याय च कक्श्याय च नमः श्रवाय च प्रतिश्रवाय च नम
आशुषेणाय चाशुरथाय च नमः शूराय चावभिन्दते च नमो वर्मिणे च वरूथिने च
नमो बिल्मिने च कवचिने च नमः श्रुताय च श्रुतसेनाय च ॥ ६ ॥

नमो दुन्दुभ्याय चाहनन्याय च नमो धृष्णवे च प्रमृशाय च नमो दूताय च प्रहिताय
च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्श्णेषवे चायुधिने च नमः स्वायुधाय च

सुधन्वने च नमः स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः सूद्याय च सरस्याय च नमो नाद्याय च वैशन्ताय च नमः कूप्याय चावट्याय च नमो वर्ष्याय चावर्ष्याय च नमो मेघ्याय च विद्युत्याय च नम ईध्रियाय चातप्याय च नमो वात्याय च रेष्मियाय च नमो वास्तव्याय च वास्तुपाय च ॥ ७ ॥

हर हर

नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च नमः शङ्गाय च पशुपतये च नम उग्राय च भीमाय च नमो अग्रेवधाय च दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय नमश्शंभवे च मयोभवे च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च नमस्तीर्थ्याय च कूल्याय च नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नम आतार्याय चालाद्याय च नमः शष्प्याय च फेन्याय च नमः सिकत्याय च प्रवाह्याय च ॥ ८ ॥

नम इरिण्याय च प्रपथ्याय च नमः किंशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्याय च गेह्याय च नमः काट्याय च गह्वरेष्ठाय च नमो हृदय्याय च निवेष्प्याय च नमः पांसव्याय च रजस्याय च नमः शुष्क्याय च हरित्याय च नमो लोप्याय चोलप्याय च नम ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च पर्णशद्याय च नमोऽपगुरमाणाय चाभिघ्नते च नम आख्खिदते च प्रख्खिदते च नमो वः किरिकेभ्यो देवानां हृदयेभ्यो नमो विक्षीणकेभ्यो नमो विचिन्वत्केभ्यो नम आनिर्हतेभ्यो नम आमीवत्केभ्यः ॥ ९ ॥

द्रापे अन्धसस्पते दरिद्र-न्नीललोहित ।
एषां पुरुषाणा-मेषां पशूनां मा भेर्माऽरो मो एषां किंचना-ममत् ॥
या ते रुद्र शिवा तनूः शिवा विश्वाह भेषजी ।
शिवा रुद्रस्य भेषजी तया नो मृड जीवसे ॥
इमाꣳ रुद्राय तवसे कपर्दिने क्शयद्वीराय प्रभरामहे मतिम् ।
यथा नः शमसद्-द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥
मृडा नो रुद्रोत नो मयस्कृधि क्शय-द्वीराय नमसा विधेम ते ।
यच्छं च योश्च मनुरायजे पिता तदश्याम तव रुद्र प्रणीतौ ॥
मा नो महान्त-मुत मा नो अर्भकं मा न उक्शन्त-मुत मा न उक्शितम् ।
मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः ॥
मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितोऽवधी-र्हविष्मन्तो नमसा विधेम ते ॥
आरात्ते गोघ्न उत पूरुषघ्ने क्शय-द्वीराय सुम्नमस्मे ते अस्तु ।
रक्शा च नो अधि च देव ब्रूह्यधा च नः शर्म यच्छ द्विबर्हाः ॥
स्तुहि श्रुतं गर्तसदं युवानं मृगन्न भीम-मुपहत्नु-मुग्रम् ।
मृडा जरित्रे रुद्र स्तवानो अन्यन्ते अस्मन्नि-वपन्तु सेनाः ॥
परिणो रुद्रस्य हेतिर्-वृणक्तु परि त्वेषस्य दुर्मतिर-घायोः ।
अव स्थिरा मघवद्-भ्यस्तनुष्व मीढ्व-स्तोकाय तनयाय मृडय ॥
मीढुष्टम शिवतम शिवो नः सुमना भव ।

परमे वृक्श आयुध-न्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदा-गहि ॥

विकिरिद विलोहित नमस्ते अस्तु भगवः ।

यास्ते सहस्रग्ं हेतयोन्-यमस्मन्नि-वपन्तु ताः - ॥

सहस्राणि सहस्रधा बाहुवो-स्तव हेतयः ।

तासा-मीशानो भगवः पराचीना मुखा कृधि ॥ १० ॥

सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम् ।

तेषाग्ं सहस्र-योजनेऽवधन्वानि तन्मसि ॥

अस्मिन् महत्यर्णवेऽन्तरिक्शे भवा अधि ॥

नीलग्रीवाः शितिकण्ठाः शर्वा अधः. क्शमाचराः - ॥

नीलग्रीवाः शितिकण्ठा दिवग्ं रुद्रा उपश्रिताः - ॥

ये वृक्षेषु सस्पिंजरा नीलग्रीवा विलोहिताः - ॥

ये भूताना-मधिपतयो विशिखासः कपर्दिनः ॥

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ॥

ये पथां पथि-रक्शय ऐलबृदा यव्युधः ॥

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ॥

य एतावन्तश्च भूयाग्ंसश्च दिशो रुद्रा वितस्थिरे ।

तेषाग्ं सहस्र-योजनेऽवधन्वानि तन्मसि ॥

नमो रुद्रेभ्यो ये पृथिव्यां येऽन्तरिक्शे ये दिवि येषामन्नं वातो वर्ष-मिषव-स्तेभ्यो

दश प्राचीर्दश दक्शिणा दश प्रतीचीर्-दशोदीचीर्-दशोर्ध्वा-स्तेभ्यो नमस्ते नो

मृडयन्तु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे दधामि ॥११ ॥

त्र्यंबकं यजामहे सुगन्धिं पुष्टि-वर्धनम् ।

उर्वारुकमिव बन्धनान्-मृत्यो-र्-मुक्शीय माऽमृतात् ॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय

नमो अस्तु ॥

तमुष्टुहि यः स्विषुः सुधन्वा यो विश्वस्य क्शयति भेषजस्य ।

यक्श्वामहे सौमनसाय रुद्रं नमोभिर्-देवम्-असुरं दुवस्य ॥

अयं मे हस्तो भगवानयं मे भगवत्तरः ।

अयं मे विश्वभेषजोऽयं शिवा-भिमर्शनः ॥

ये ते सहस्र-मयुतं पाशा मृत्यो मर्त्याय हन्तवे ।

तान् यज्ञस्य मायया सर्वानव यजामहे ॥

मृत्यवे स्वाहा मृत्यवे स्वाहा ॥

ॐ नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि ।

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः ।

तेना-न्नेनाप्यायस्व ॥

नमो रुद्राय विष्णवे मृत्युर्मे पाहि ॥

सदाशिवोम् ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

॥ चमकप्रश्नः ॥

अग्ना-विष्णू सजोषसे-मा वर्धन्तु वां गिरः ।

द्युम्नैर्-वाजेभिरागतम् ॥

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे प्राणश्च मेऽपानश्च मे व्यानश्च मेऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्शश्च मे बलं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थानि च मे परूंषि च मे शरीराणि च मे ॥ १ ॥

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मेऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे सुकृतं च मे वित्तं च मे वेद्यं च मे भूतं च मे भविष्यच्च मे सुगं च मे सुपथं च म ऋद्धं च म ऋद्धिश्च मे क्लृतं च मे क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे ॥ २ ॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च

मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥ ३ ॥

ऊर्क्च मे सूनृता च मे पयश्च मे रसश्च मे घृतं च मे मधु च मे सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मेऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मेऽक्षुच्च मे व्रीहियश्च मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे गोधूमाश्च मे मसुराश्च मे प्रियंगवश्च मेऽणवश्च मे श्यामकाश्च मे नीवाराश्च मे ॥ ४ ॥

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मेऽयश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च मेऽकृष्टपच्यं च मे ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे ॥ ५ ॥

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे

वरुणश्च म इन्द्रश्च मे त्वष्टा च म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मेऽन्तरिक्शं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे ॥ ६ ॥

अग्ंशुश्च मे रश्मिश्च मेऽदाभ्यश्च मेऽधिपतिश्च म उपाग्ंशुश्च मेऽन्तर्यामश्च म ऐन्द्र-वायवश्च मे मैत्रा-वरुणश्च म आश्विनश्च मे
प्रति-प्रस्थानश्च मे शुक्रश्च मे मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च मेऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवाश्च मे मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे ॥ ७ ॥

इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मेऽधिषवणे च मे द्रोण-कलशश्च मे वायव्यानि च मे पूतभृच्च म आध-वनीयश्च म आग्नीध्रं च मे हविर्धानं च मे गृहाश्च मे सदश्च मे पुरोडाशाश्च मे पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे ॥ ८ ॥

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे प्राणश्च मेऽश्वमेधश्च मे पृथिवी च मेऽदितिश्च मे दितिश्च मे द्यौश्च मे शक्क्वरीरङ्-गुलयो दिशश्च मे यज्ञेन कल्पन्ताम्-ऋक्क मे साम च मे स्तोमश्च मे यजुश्च मे दीक्शा च मे तपश्च म ऋतुश्च मे व्रतं च मेऽहोरात्रयोर्वृष्ट्या बृह-द्रथन्तरे च मे यज्ञेन कल्पेताम् ॥ ९ ॥

गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट् च मे तुर्यौही च मे पष्ठवाट् च मे पष्ठौही च म उक्शा च मे वशा च म ऋषभश्च मे वेहच्च मेऽनड्वाञ्च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पताम्-अपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्शुर्-यज्ञेन कल्पताग्ग् श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्यज्ञेन कल्पताम्-आत्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पताम्॥ १० ॥

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविंग्-शतिश्च मे त्रयोविंग्-शतिश्च मे पञ्चविंग्-शतिश्च मे सप्तविंग्-शतिश्च मे नवविंग्-शतिश्च म एकत्रिंग्-शच्च मे त्रयस्त्रिंग्-शच्च मे चतस्रश्च मेऽष्टौ च मे द्वादश च मे षोडश च मे विंग्-शतिश्च मे चतुर्विंग्-शतिश्च मेऽष्टाविंग्-शतिश्च मे द्वात्रिंग्-शच्च मे षट्त्रिंग्-शच्च मे चत्वरिंग्-शच्च मे चतुश्-चत्वारिंग्-शच्च मेऽष्टाचत्वारिंग्-शच्च मे

वाजश्च प्रसवश्चा-पिजश्च क्रतुश्च सुवश्च मूर्धा च व्यश्नियश्-चान्त्यायनश्-चान्त्यश्च भौवनश्च भुवनश्चा-धिपतिश्च ॥ ११ ॥

ॐ इडा देवहूर्-मनुर्यज्ञनीर्-बृहस्पतिरुक्था-मदानि शंग्सिष-द्विश्वेदेवाः सूक्त-वाचः पृथिवी-मातर्मा मा हिंग्सीर्-मधु मनिष्ये मधु जनिष्ये मधु वक्श्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासंग् शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥ ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

## ६ पुरुष सूक्तम्

॥ पुरुष सूक्तम् ॥

ॐ तच्छं योरा-वृणीमहे । गातुं यज्ञाय । गातुं यज्ञ-पतये । दैवी स्स्वस्तिरस्तु नः ।
स्वस्तिर्-मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शं चतुष्पदे ।
ॐ शान्ति श्शान्ति श्शान्तिः । ॐ

सहस्र-शीर्षा पुरुषः । सहस्राक्शः सहस्रपात् - । स भूमिं विश्वतो वृत्वा ।
अत्यतिष्ट-द्दशाङ्गुलम् । पुरुष एवेदग्ं सर्वम् । यद्भूतं यच्च भव्यम् । उताम्-ऋतत्व-
स्येषानः । यद-न्नेनाति-रोहति । एता-वानस्य महिमा । अतो ज्यायाग्ग्श्च पूरुषः ।
पादोऽस्य विश्वा भूतानि । त्रिपाद्-स्यामृतं दिवि । त्रिपादूर्ध्व उदैत्-पुरुषः ।
पादोऽस्येहाऽऽभवात्पुनः । ततो विश्वङ्व्यक्रामत् । साशना-नशने अभि ।
तस्माद्विरा-डजायत । विराजो अधि पूरुषः । स जातो अत्यरिच्यत । पश्चाद्-
भूमि-मथो पुरः । यत्-पुरुषेण हविषा । देवा यज्ञ-मतन्वत । वसन्तो अस्या-
सीदाज्यम् । ग्रीष्म इध्म श्शरद्धविः । सप्तास्यासन्-परिधयः । त्रिः सप्त समिधः
कृताः - । देवा यद्यज्ञं तन्वानाः - । अबध्नन्-पुरुषं पशुम् । तं यज्ञं बर्हिषि प्रौक्षन् ।
पुरुषं जातम-ग्रतः । तेन देवा अयजन्त । साध्या ऋषयश्च ये । तस्माद्यज्ञात्-
सर्वहुतः । संभृतं पृषदाज्यम् । पशूग्ग्स्ताग्ग्श्-चक्रे वायव्यान् । आरण्यान्-
ग्राम्याश्च ये । तस्माद्यज्ञात्-सर्वहुतः । ऋचः सामानि जज्ञिरे । छन्दाग्ंसि जज्ञिरे
तस्मात् । यजुस्तस्मा-दजायत । तस्मादश्वा अजायन्त । ये के चोभया-दतः ।
गावो ह जज्ञिरे तस्मात् । तस्मा-ज्जाता अजावयः । यत्पुरुषं व्यदधुः । कतिधा

व्यकल्पयन्। मुखं किमस्य कौ बाहू। कावूरू पादा-वुच्येते। ब्राह्मणोऽस्य मुखमासीत्-। बाहू राजन्यः कृतः।

ऊरू तदस्य यद्वैश्यः। पद्भ्याग्ं शूद्रो अजायत। चन्द्रमा मनसो जातः। चक्शोः सूर्यो अजायत। मुखा-दिन्द्र-श्चाग्निश्च। प्राणाद्-वायु-रजायत। नाभ्या आसी-दन्तरिक्शम्। शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्-दिशः श्रोत्रात्। तथा लोकाग्ं अकल्पयन्. । वेदा-हमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तु पारे। सर्वाणि रूपाणि विचित्य धीरः। नामानि कृत्वाऽभिवदन्, यदास्ते। धाता पुरस्ता-द्यमुदा-जहार। शक्रः प्रविद्वान्-प्रदिशश्-चतस्रः। तमेवं विद्वान्-अमृत इह भवति। नान्यः पन्था अयनाय विद्यते। यज्ञेन यज्ञ-मयजन्त देवाः -। तानि धर्माणि प्रथमान्-यासन्-। ते ह नाकं महि-मानः सचन्ते। यत्र पूर्वे साध्याः सन्ति देवाः -। ॐ नमो नारायणा॒य॥

॥ उत्तरनारायणम्॥

अद्भ्यः संभूतः पृतिव्यै रसाच्च। विश्व-कर्मणः समवर्-तताधि। तस्य त्वष्टा विदध-द्रूपमेति। तत्-पुरुषस्य विश्व-माजान-मग्रे। वेदा-हमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसः परस्तात्-। तमेवं विद्वान्-अमृत इह भवति। नान्यः पन्था विद्यते-यऽनाय। प्रजापतिश्-चरति गर्भे अन्तः। अजा-यमनो बहुधा विजायते। तस्य धीराः परि-जानन्ति योनिम्। मरीचीनां पदम्-इच्छन्ति वेदसः॥ यो देवेभ्य आतपति। यो देवानां पुरो-हितः। पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये। रुचं ब्राह्मम् जनयन्तः। देवा अग्रे तदब्रुवन्-। यस्त्वैवं ब्राह्मणो विद्यात्-। तस्य

देवा असन् , वशे । ह्रीश्च ते लक्श्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् ।
अश्विनौ व्यात्तम् । इष्टम् मनिषाण । अमुं मनिषाण । सर्वम् मनिषण ।
ॐ तच्छं योरा-वृणीमहे । गातुं यज्ञाय । गातुं यज्ञ-पतये । दैवी स्स्वस्तिरस्तु नः ।
स्वस्तिर्-मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शं चतुष्पदे ।
ॐ शान्ति श्शान्ति श्शान्तिः ।

## ७ नारयण सूक्तम्

॥ नारायण सूक्तम् ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवा-वहै । तेजस्विनाव्-अधीतमस्तु मा विद्विषा-वहै ॥ ॐ शान्ति श्शान्ति शान्तिः ॥

ॐ ॥ सहस्त्रशीर्षं देवं विश्वाक्शं विश्वशम्-भुवं ।
विश्वं नारायणं देवमक्शरं परमं पदम् ॥
विश्वतः परमा-न्नित्यं विश्वं नारायणꣳ हरिम् ।
विश्वमेवेदं पुरुष-स्तद्विश्वम्-उपजीवति ॥
पतिं विश्वस्यात्-मेश्वरꣳ शाश्वतꣳ शिव-मच्युतम् । नारायणं महाज्ञेयं विश्वात्मानं परायणम् ॥ नारायण-परो ज्योतिरात्मा नारायणः परः ।
नारायण परं ब्रह्म तत्वं नारायणः परः ।
नारायण-परो ध्याता ध्यानम् नारायणः परः ॥
यच्च किञ्चि-ज्जगत्-सर्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर्-बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥

अनन्त-मव्ययं कविं समुद्रेऽन्तं विश्व-शम्भुवम् ।
पद्मकोश प्रतीकाशं हृदयं चाप्यधो-मुखम् ॥
अधो निष्ट्या वितस्यान्ते नाभ्या-मुपरि तिष्ठति । ज्वालमाला-कुलं भाति
विश्वस्या-यतनं महत् ॥
सन्ततं शिलाभिस्तु-लम्बत्या-कोश-सन्निभम् ।
तस्यान्ते सुषिरं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम् ॥
तस्य मध्ये महनग्निर्-विश्वार्चिर्-विश्वतो-मुखः । सोऽग्रभुग्वि-भजन्तिष्ठ-न्नाहार-
मजरः कविः ॥ तिर्यगूर्ध्व-मधश्शायी रश्मय-स्तस्य सन्तता ।
सन्ता-पयति स्वं देह-मापाद-तल-मस्तकः ।
तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः ॥ नीलतो-यद-मध्यस्थाद्-
विद्युल्लेखेव भास्वरा । नीवार-शूकव-त्तन्वी पीता भास्वत्य-णूपमा ॥
तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ।
स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् - ॥
ऋतं सत्यं परं ब्रह्म पुरुषं कृष्ण-पिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै
नमो नमः ॥
नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥
ॐ शान्ति श्शान्ति श्शान्तिः ॥

॥ विष्णु सूक्तम् ॥

ॐ विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि यो अस्कभाय-दुत्तरं सधस्थं विचक्रमाण-स्त्रेधो-रुगायो विष्णो-रराटमसि विष्णोः पृष्ठमसि विष्णोः श्नप्त्रेस्थो विष्णो स्स्यूरसि विष्णोर्-ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

तदस्य प्रियम-भिपाथो अश्याम् ।
नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुरित्था ।
विष्णोः पदे परमे मध्व उत्थ्सः ।
प्रतद्विष्णु स्स्तवते वीर्याय ।
मृगो न भीमः कुचरो गिरिष्ठाः - ।
यस्योरुषु त्रिषु विक्रमणेषु ।
अधिक्शियन्ति भुवनानि विश्वा ।
परो मात्रया तनुवा वृधान ।
न ते महित्व-मन्व-श्नुवन्ति ॥
उभे ते विद्म रजसि पृथिव्या विष्णो देवत्वम् ।
परमस्य विथ्से ।
विचक्रमे पृथिवी-मेष एताम् ।
क्षेत्राय विष्णुर्-मनुषे दशस्यन् - ।

ध्रुवासो अस्य कीरयो जनासः ।
उरुक्षितिं सुजनिमा-चकार ।
त्रिर्देवः पृथिवीमेष एताम् ।
विचक्रमे शतर्चसं महित्वा ।
प्रविष्णुर्-अस्तु तवस-स्तवीयान् ।
त्वेषग्ग्यस्य स्थविरस्य नाम ॥
अतो देवा अवन्तुनो यतो विष्णुर्-विचक्रमे ।
पृथिव्या स्सप्त धामभिः ।
इदं विष्णुर्-विचक्रमे त्रेधा निदधे पदम् ।
समू-ढमस्य पांसुरे ।
त्रिंणि पदा विचक्रमे विष्णुर्-गोपा अदाभ्यः ।
ततो धर्माणि धारयन् ।
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ।
इन्द्रस्य युज्य स्सका ॥
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्शु-राततम् ।
तद्विप्रासो विपन्यवो जागृवांस सस्समिन्धते ।
विष्णोर्-यत्परमं पदम् ।

पर्याप्त्या अनन्त-रायाय सर्वस्तोमोऽति रात्र उत्तम महर्-भवति सर्व-स्याप्त्यै

सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

## ९ श्री सूक्तम्

॥ श्री सूक्तम् ॥

हिरण्य-वर्णां हरिणीं सुवर्ण-रजतस्रजाम् ।

चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

तां म आवह जातवेदो लक्ष्मी-मनपगा-मिनीम् ।

यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥

अश्वपूर्वां रथमध्यां हस्तिनाद-प्रबोदिनीम् ।

श्रियं देवी-मुपह्वये श्रीर्मा देवीर् जुषताम् ॥

कांसोस्मि तां हिरण्य-प्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।

पद्मे स्थितां पद्मवर्णां तामि-होपह्वये श्रियम् ॥

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देव-जुष्टा-मुदाराम् ।

तां पद्मिनीमीं शरण-महं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥

आदित्यवर्णे तपसोऽधिजातो वनस्पति-स्तव वृक्षोऽथ बिल्वः ।

तस्य फलानि तपसा नुदन्तु मायान्तरा-याश्च बाह्या अलक्ष्मीः - ॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।

प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिम्-ऋद्धिं ददातु मे ॥

क्षुत्पिपासा-मलां ज्येष्ठा-मलक्ष्मीं नाशया-म्यहम्। अभूति-मसम्-ऋद्धिं च सर्वां

निर्णुदमे गृहात् -॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।

ईश्वरीगं सर्व-भूतानां तामि-होपह्वये श्रियम्॥

मनसः काम-माकूतिं वाचः सत्य-मशीमहि।

पशूनां रूपम-न्नस्य मयि श्रीः श्रयतां यशः॥

कर्दमेन प्रजाभूता मयि सम्भव कर्दम।

श्रियं वासय मे कुले मातरं पद्म-मालिनीम्॥

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे।

निचदेवीं मातरं श्रियं वासय मे कुले॥

आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्म-मालिनीम्।

चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥

आर्द्रां यः करिणीं यष्टिं सुवर्णां हेम-मालिनीम्।

सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह॥

तां म आवह जातवेदो लक्ष्मी-मनपगा-मिनीम्।

यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्, विन्देयं पुरुषा-नहम्॥

महा-देव्यै च विद्महे विष्णु-पत्नी च धीमहि।

तन्नो लक्ष्मीः प्रचोदयात्॥

श्री-वर्चस्य-मायुष्य-मारोग्य-माविधात् षोभामानं महीयते।

धान्यं धनं पशुं बहु-पुत्रलाभं शतसंवत्सरं दिर्घमायुः ॥

यः शुचिः प्रयतो भूत्वा जुहुया-दाज्य मन्वहम् ।
श्रियः पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥

पद्मानने पद्म ऊरू पद्माक्षी पद्मसम्भवे ।
त्वं मां भजस्व पद्माक्षी येन सौख्यं लभाम्यहम् ॥

अश्वदायी गोदायी धनदायी महाधने ।
धनं मे जुषतां देवि सर्व-कामांश्च देहि मे ॥

पुत्र पौत्रं धनं धान्यं हस्त्यश्वा-दिगवे रथम् ।
प्रजानां भवसि माता आयुष्मन्तं करोतु माम् ॥

धनम्-अग्निर्-धनं वायुर्-धनं सूर्यो धनं वसुः ।
धनमिन्द्रो बृहस्पतिर्-वरुणं धनम्-अश्नु ते ।

वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृत-पुण्यानां भक्तानां श्रीसूक्तं जपेत्सदा ॥

रोहन्तु सर्व-बीजान्यव ब्रह्म द्विषो जहि ।

पद्म-प्रिये पद्मिनि पद्महस्ते पद्मालये पद्मदला-यताक्षि ।
विश्वप्रिये विष्णु मनोऽनुकूले त्वत्-पादपद्मं मयि सन्निधत्स्व ॥

या सा पद्मासनस्था विपुल-कटितटी पद्म-पत्रायताक्षी ।

गम्भीरा वर्तनाभिः स्तनभर नमिता शुभ्र वस्त्रोत्तरीया ॥

लक्ष्मीर्-दिव्यैर्-गजेन्द्रै-मणिगण खचितै स्स्नापिता हेमकुम्भैः - ।

नित्यं सा पद्महस्ता मम वसतु गृहे सर्व-माङ्गल्य युक्ता ॥

लक्ष्मीं क्षीर-समुद्र राज-तनयां शीरङ्ग-धामेश्वरीम् ।

दासीभूत-समस्त देव विनितां लोकैक दीपान्कुराम् ॥

श्रीमन्-मन्दकटा-क्षलब्ध विभव ब्रह्मेन्द्र-गङ्गाधराम् ।

त्वां त्रैलोक्य कुटुम्बिनीं सरसिजां वन्दे मुकुन्द-प्रियाम् ॥

सिद्धलक्ष्मीर्-मोक्षलक्ष्मीर्-जयलक्ष्मी स्सरस्वती ।

श्रीलक्ष्मीर्-वर लक्ष्मीश्च प्रसन्ना मम सर्वदा ॥

वरांकुशौ पाशमभि-तिमुद्रां करैर्-वहन्तीं कमला-सनस्थाम् ।

बालार्क कोटि प्रतिभां त्रिनेत्रां भजे-हमाद्यां जगदीश्वरीं त्वाम् ॥

सर्वमङ्गल-माङ्गल्ये शिवे सर्वार्थ साधिके ।

शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते ॥ नारायणि नमोऽस्तु ते । नारायणि नमोऽस्तु ते ॥

सरसिज-निलये सरोजहस्ते धवलत-रांशुक गन्ध-माल्यशोभे ।

भगवति हरि-वल्लभे मनोज्ञे त्रिभुवन-भूतिकरि प्रसीद मह्यम् ॥

विष्णुपत्नीं क्षमा देवीं माधवीं माधव-प्रियाम् ।

निष्णोः प्रियसखीं देवीं नमाम्यच्युत-वल्लभाम् ॥

महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि ।

तन्नो लक्ष्मीः प्रचोदयात् ॥

श्री-वर्चस्य-मायुष्य-मारोग्य-माविधात् षोभामानं महीयते ।

धान्यं धनं पशुं बहु-पुत्रलाभं शतसंवत्सरं दिघमायुः ॥

ऋणरोगादि-दरिद्य-पापक्षुद-पमृत्यवः ।

भयशोक-मनस्तापा नश्यन्तु मम सर्वदा ॥

श्रिये जात श्रिय आनिर्याय श्रियं वयो जनितृभ्यो दधातु ।

श्रियं वसाना अमृत-त्वमायन् भजंति सद्यः सविता विदध्यून् ॥

श्रिय एवैनं तच्छ्रियामा-दधाति ।

सन्ततमृचा वष्टकृत्यं सन्धत्तं सन्धीयते प्रजया पशुभिः ॥

य एवं वेद ।

ॐ महादेव्यै च विद्महे विष्णुपत्नी च धीमहि ।

तन्नो लक्ष्मीः प्रचोदयात् ॥

ॐ शान्तिः श्शान्तिः श्शान्तिः ॥

## १० भू सूक्तम्

॥ भू सूक्तम् ॥

ॐ ॥ भूमिर्-भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा ।

उपस्थे ते देव्य-दिते ऽग्निमन्नाद-मन्नाद्या-यादधे ॥

आऽयङ्गौः पृश्निर-क्रमी दसनन्-मातरं पुनः ।

पितरं च प्रयन्त्-सुवः ॥ त्रिंशद्धाम विराजति वाक्-पतङ्गाय शिश्रिये ।

प्रत्यस्य वह द्युभिः ॥

अस्य प्राणाद्-पानत्यन्तश्-चरति रोचना ।

व्यख्यन् महिषः सुवः ॥

यत्त्वा क्रुद्धः परोवप-मन्युना यदवर्त्या ।

सुकल्पमग्ने तत्तव पुनस्त्वो-द्दीपयामसि ॥

यत्ते मन्युप-रोप्तस्य पृथिवी-मनुदध्वसे ।

आदित्या विश्वे तद्देवा वसवश्च समाभरन् ॥

मेदिनी देवी वसुन्धरा स्याद्वसुदा देवी वासवी ।

ब्रह्मवर्चसः पितृणाग्ग् श्रोत्रं चक्षुर्मनः ॥

देवी हिरण्य-गर्भिणी देवी प्रसूवरी ।

सदने सत्यायने सीद ॥

समुद्रवती सावित्रीह नो देवी मह्यङ्गी ।

मही-धरणी महोव्यथिष्ठा श्शृङ्गे श्रृङ्गे यज्ञे यज्ञे विभीषणी ॥

इन्द्रपत्नी व्यापिनी सुरसरिदिह ।

वायुमती जलशयनी श्रियंधा राजा सत्यन्धो-परिमेदिनी ॥ श्वोपरि-धत्त परिगाय ।

विष्णुपत्नीं महीं देवीं माधवीं माधव-प्रियाम् ।

लक्ष्मी प्रियसखीं देवीं नमाम्यच्युत वल्लभाम् ॥

ॐ धनुर्-धरायै विद्महे सर्व-सिद्ध्यै च धीमहि । तन्नो धराः प्रचोदयात् ॥

महीं देवीं विष्णुपत्नी-मजूर्याम् ।

प्रतीची मेनागं हविषा यजामः ॥

त्रेधा विष्णु-रुरुगायो विचक्रमे ।

महीं दिवं पृथिवी-मन्तरिक्षम् ॥

तच्छ्रोणै-तिश्रव-इच्छमाना ।

पुण्यग्ग् श्लोकं यजमानाय कृण्वति ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

११ नीळा सूक्तम्

॥ नीळा सूक्तं ॥

नीळा-देवीगं शरणमहं प्रपद्ये ।

गृणाहि ।

घृतवती सवित-राधिपत्यैः पयस्वतीर्-अन्तिराशानो अस्तु ।

ध्रुवा दिशां विष्णु-पत्न्यघोराऽस्येशाना-सहसोया मनोता । बृहस्पतिर्-मातरिश्वोत

वायुः सन्धुवाना-वाता अभि नो गृणन्तु ।

विष्टम्भो दिवो-धरुणः पृथिव्या अस्येश्याना जगतो विष्णुपत्नी ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

१२ दुर्गा सूक्तम्

॥ दुर्गा सूक्तम् ॥

जातवेदसे सुनवाम सोम मरातीयतो निदहाति-वेदः ।

स नः पर्षदति दुर्गाणि विश्व नावेव सिन्धुं दुरिताऽत्यग्निः ॥

ताम् अग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्म-फलेषु जुष्टाम्।
दुर्गां देवीꣳ शरणमहं प्रपद्ये सुतरसि तरसे नमः॥
अग्ने त्वं पारया नव्यो अस्मान्थ्-स्वस्तिभिरिति दुर्गाणि विश्वा।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः॥
विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरिताऽतिपर्षि।
अग्ने अत्रिवन् मनसा गृणानोऽस्माकम् बोध्यवित तनूनाम्॥
पृतना जितꣳ सहमान-मुग्रम्-अग्निꣳ हुवेम परमाथ्-सधस्थात्।
स नः पर्षदति दुर्गाणि विश्वा क्षामद् देवो अति-दुरिताऽत्यग्निः॥
प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सत्सि।
स्वाञ्चाऽग्ने तनुवं पिप्रय-स्वास्मभ्यं च सौभगमा-यजस्व॥
गोभिर्-जुष्ट-मयुजो निषिक्तं तवेन्द्र विष्णो-रनुसं-चरेम।
नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम्॥
ॐ कात्यायनाय विद्महे कन्यकुमारि धीमहि।
तन्नो दुर्गिः प्रचोदयात्॥
ॐ शान्ति श्शान्ति श्शान्तिः॥

## १३ देवी सूक्तम्

॥ देवी सूक्तं॥

अहं रुद्रेभिर्-वसुभिश्-चराम्यहम्-आदित्यैर्-उत विश्वदेवैः -।
अहं मित्रा-वरुणोभा बिभर्म्यहम्-इन्द्राग्नी अहम्-अश्विनोभा॥

अहं सोममाह-नसं बिभर्म्यहं त्वष्टा-रमुत पूषणं भगम् ।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये ३ यजमानाय सुन्वते ॥
अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्या वेशयन्तीं ॥
मया सोऽन्नमत्ति यो विपश्यति यः प्राणिति यरीं शृणोत्युक्तं ।
अमन्तवो मान्त उप क्षियन्ति श्रुधिश्रुत श्रद्धिवं ते वदामि ॥
अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः ।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधां ॥
अहं रुद्राय धनु-रातनोमि ब्रह्मद्विषे शरवे हन्त वा उ ।
अहं जनाय समदं कृणो-म्यहं द्यावा-पृथिवी आ विवेश ॥
अहं सुवे पितर-मस्य मूर्धन् मम योनिरप्स्व १न्तः समुद्रे ।
ततो वितिष्ठे भुवनानु विश्वो तामूं द्यां वर्ष्मणो-पस्पृशामि ॥
अहमेव वातऽव प्रवाम्यार-भमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यै तावती महिना सं बभूव ॥
ॐ शान्ति श्शान्ति श्शान्तिः ॥

## १४ सरस्वती सूक्तम्

॥ सरस्वति सूक्तम् ॥

ऋग् १ . ३

अश्विना यज्वरी-रिषो द्रवत्पाणी शुभस्पति ।

पुरुभुजा चनस्यतम् ॥
अश्विना पुरुदंससा नरा शवीरया धिया ।
धिष्ण्या वनतं गिरः ॥
दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः ।
आ यातं रुद्रवर्तनी ॥
इन्द्रा याहि चित्रभानो सुता इमे त्वायवः ।
अण्वी-भिस्तना पूतासः ॥
इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः ।
उप ब्रह्माणि वाघतः ॥
इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः ।
सुते दधिष्व नश्चनः ॥
ओमासश्चर्-षणीधृतो विश्वे देवास आ गत ।
दाश्वांसो दाशुषः सुतम् ॥
विश्वे देवासो अप्तुरः सुतमा गन्त तूर्णयः ।
उस्रा इव स्वसराणि ॥
विश्वे देवासो अस्रिध एहि-मायासो अद्रुहः ।
मेधं जुषन्त वह्नयः ॥
पावका नः सरस्वती वाजे-भिर्वा-जिनीवती ।
यज्ञं वष्टु धियावसुः ॥

चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् ।

यज्ञं दधे सरस्वति ॥

महो अर्णः सरस्वती प्र चेतयति केतुना ।

धियो विश्वा वि राजति ॥

ऋग् ६ . ६१

इयम् अददाद् रभसं ऋणच्युतं दिवोदासं वध्र्यश्वाय दाशुषे ।

या शश्वन्तम् आचखादावसं पणिं ता ते दात्राणि तविषा सरस्वति ॥

इयं शुष्मेभिर् बिसखा इवारुजत् सानु गिरीणां तविषेभिर् ऊर्मिभिः ।

पारावतघ्नीम् अवसे सुवृक्तिभिः सरस्वतीम् आ विवासेम धीतिभिः ॥

सरस्वति देवनिदो नि बर्हय प्रजां विश्वस्य बृसयस्य मायिनः ।

उत क्षितिभ्यो ऽवनीर् अविन्दो विषम् एभ्यो अस्रवो वाजिनीवति ॥

प्र णो देवी सरस्वती वाजेभिर् वाजिनीवती ।

धीनाम् अवित्र्य् अवतु ॥

यस् त्वा देवि सरस्वत्य् उपब्रूते धने हिते ।

इन्द्रं न वृत्रतूर्ये ॥

त्वं देवि सरस्व॒त्य् अवा वाजेषु वाजिनि ।

रदा पूषेव नः सनिम् ॥

उत स्या नः सरस्वती घोरा हिरण्य-वर्तनिः ।

वृत्रघ्नी वष्टि सुष्टुतिम् ॥

यस्या अनन्तो अह्रुतस् त्वेषश् चरिष्णुर् अर्णवः ।
अमश् चरति रोरुवत् ॥
सा नो विश्वा अति द्विषः स्वसॄर् अन्या ऋतावरी ।
अतन्न् अहेव सूर्यः ॥
उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा ।
सरस्वती स्तोम्या भूत् ॥
आपप्रुषी पार्थिवान्य् उरु रजो अन्तरिक्षम् ।
सरस्वती निदस् पातु ॥
त्रिषधस्था सप्तधातुः पञ्च जाता वर्धयन्ती ।
वाजे-वाजे हव्या भूत् ॥
प्र या महिम्ना महिनासु चेकिते द्युम्नेभिर् अन्या अपसाम् अपस्तमा ।
रथ इव बृहती विभ्वने कृतोप-स्तुत्या चिकितुषा सरस्वती ॥
सरस्वत्य् अभि नो नेषि वस्यो माप स्फरीः पयसा मा न आ धक् ।
जुषस्व नः सख्या वेश्या च मा त्वत् क्षेत्राण्य् अरणानि गन्म ॥
ऋग् ८ . १००
यद्वाग् वदन्त्यवि-चेतनानि राष्ट्रि देवानां निषसाद मद्रा ।
चतस्र ऊर्जं दुदुहे पयांसि क्व स्विदस्याः परमं जगाम ॥
देवीं वाचम-जनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।
सा नो मन्द्रेष-मूर्जं दुहाना धेनुर्-वागस्-मानुप सुष्टुतैतु ॥

ऋग्.१ . १६४

चत्वारि वाक् परिपदानि तानि विदुर्-ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति॥
ॐ शान्ति श्शान्ति श्शान्तिः॥

१५ मेधा सूक्तम्

॥ मेधा सूक्तम्॥

ॐ यश्छन्दसा-मृषभो विश्वरूपः। छन्दोभ्योऽध्यमृता-थ्संबभूव।
स मेन्द्रो मेधया स्पृणोतु।
अमृतस्य देव-धारणो भूयासम्।
शरीरं मे विचर्षणम्।
जिह्वा मे मधु-मत्तमा।
कर्णाभ्यां भूरि-विश्रुवम्।
ब्रह्मणः कोशोऽसि मेधया पिहितः।
श्रुतं मे गोपाय।
ॐ शन्ति श्शन्ति श्शन्तिः॥ ॐ।

मेधादेवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्य-माना।
त्वया जुष्टा नुदमाना दुरुक्तान् बृहद्वदेम विदथे सुवीराः। त्वया जुष्ट ऋषिर्-भवति
देवि त्वया ब्रह्माऽऽगतश्रीरुत त्वया। त्वया जुष्टश्-चित्रं विन्दते वसु सानो जुषस्व
द्रविणो न मेधे॥ मेधां म इन्द्रो ददातु मेधां देवी सरस्वती।

मेधां मे अश्विनावुभा-वाधत्तां पुष्कर-स्रजा ।

अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः ।

दैवीं मेधा सरस्वती सा मां मेधा सुरभिर्-जुषताग्ग् स्वाहा ॥ आमां मेधा सुरभिर्-
विश्वरूपा हिरण्य-वर्णा जगती जगम्या । ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा
सुप्रतीका जुषन्ताम् । मयि मेधां मयि प्रजां मय्यग्निस्-तेजो दधातु मयि मेधां मयि
प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ।

ॐ महादेव्यै च विद्महे ब्रह्म-पत्नी च धीमहि ।

तन्नो वाणीः प्रचोदयात् ॥

ॐ हंस हंसाय विद्महे परम-हंसाय धीमहि ।

तन्नो हंसः प्रचोदयात् ॥

ॐ तत्-दक्षिणाय विद्महे गुरु-मुर्तये धीमहि ।

तन्न श्शिवः प्रचोदयात् ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

## १६ रात्रि सूक्तम्

रात्री व्य् अख्यद् आयती पुरुत्रा देव्य् अ१ क्षभिः ।

विश्वा अधि श्रियो ऽधित ॥

ओर्व् अप्रा अमर्त्या निवतो देव्य् उ१ द्वतः ।

ज्योतिषा बाधते तमः ॥

निर् उ स्वसा रमस्कृतोषसं देव्य् आयती ।

अपेद् उ हासते तमः ॥

सा नो अद्य यस्या वयं नि ते यामन्न् अविक्ष्महि ।

वृक्षे न वसतिं वयः ॥

नि ग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः ।

नि श्येनासश् चिद् अर्थिनः ॥

यावया वृक्य१ं वृकं यवय स्तेन मूर्म्ये ।

अथा नः सुतरा भव ॥

उप मा पेपिशत् तमः कृष्णं व्यक्तम् अस्थित ।

उष ऋणेव यातय ॥

उप ते गा इवाकरं वृणीष्व दुहितर् दिवः ।

रात्रि स्तोमं न जिग्युषे ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

## १७ भाग्य सूक्तम्

॥ प्रातः काल मन्त्राः ॥

उत्तिष्ठ ब्रह्मणस्-पते देवयन्तस् त्वेमहे ।

उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर् भवा सचा ॥

उत्तिष्ठ-ताव पश्य-तेन्द्रस्य भागम् ऋत्वियम् ।

यदि श्रातो जुहोतन यद्यश्रातो ममत्तन ॥

जज्ञान एव व्यबाधत स्पृधः प्रापश्यद् वीरो अभि पौंस्यं रणम् ।

अवृश्चद् अद्रिम् अव सस्यदः सृजद् अस्तभ्नान् नाकं स्वपस्यया पृथुम् ॥

आ याहि वनसा सह गावः सचन्त वर्तनिं यद् ऊधभिः ॥

आ याहि वस्व्या धिया मंहिष्ठो जारयन्मखः सुदानुभिः ॥

पितुभृतो न तन्तुम् इत् सुदानवः प्रति दध्मो यजामसि ॥

उषा अप स्वसुस् तमः सं वर्तयति वर्तनिं सुजातता ॥

॥ भाग्य सूक्तम् ॥

प्रातर्-अग्निं प्रातर्-इन्द्रगं हवामहे । प्रातर्-मित्रावरुणा प्रातर्-अश्विना ।

प्रातर्-भगं पूषणम् ब्रह्मणस्-पतिम् । प्रातः सोमम्-उत रुद्रगं हुवेम ॥

प्रातर्जितं भगम्-उग्रगं हुवेम । वयम् पुत्र-मदितेर्यो विधर्ता ।

आध्रश्-चिद्यम् मन्यमानस्-तुरश्चित् । राजा चिद्यम् भगं भक्षीत्याह ॥

भग प्रणेतर्-भग सत्यराधः । भगेमां धिय-मुदवा-ददन्नः ।

भग प्र णो जनय गोभिर् अश्वैः । भग प्र नृभिर्-नृवन्तः स्याम ॥

उतेदानीं भगवन्तः स्याम । उत प्रपित्व उत मध्ये अह्नाम् ।

उतोदिता मघवन् सूर्यस्य । वयं देवानागं सुमतौ स्याम ॥

भग एव भगवागं अस्तु देवाः । तेन वयम् भगवन्तः स्याम ।

तं त्वा भग सर्व इज्जोहवीमि । स नो भग पुर एता भवेह ॥

सम्-अध्वरा-योषसो ऽनमन्त । दधिक्रावेव शुचये पदाय ।

अर्वाचीनं वसुविदम् भगन्नः । रथ-मिवाश्वा वाजिन आ वहन्तु ॥

अश्वावतीर्-गोमतीर्-न-उषासः । वीरवतीः सद-मुच्छन्तु भद्राः ।

घृतं दुहाना विश्वतः प्रपीनाः । यूयम् पात स्वस्तिभिः सदा नः ॥

यो माऽग्ने भागिनग्ं सन्तं अथाभागं चिकीर्षति ।

अभाग-मग्ने तं कुरु मामग्ने भागिनं कुरु ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

१८ आयुष्य सूक्तम्

॥ आयुष्य सूक्तम् ॥

यो ब्रह्म ब्रह्मण उज्जहार प्राणैः शिरः कृत्ति-वासाः पिनाकी ।

ईशानो देवः स न आयुर्दधातु तस्मै जुहोमि हविषा घृतेन ॥ १ ॥

विभ्राज-मानः सरिरस्य मध्य-द्रोचमानो घर्म-रुचिर्य आगात् - ।

स मृत्यु-पाशान-पनुद्य घोरानि-हायुषेणो घृतमत्तु देवः ॥ २ ॥

ब्रह्म-ज्योतिर्-ब्रह्म-पत्नीषु गर्भं यमा-दधात् पुरुरूपं जयन्तम् ।

सुवर्ण-रंभ-ग्रह-मर्कमर्च्यं तमायुषे वर्धयामो घृतेन ॥ ३ ॥

श्रियं लक्ष्मी-मौबला-मंबिकां गां षष्ठिं च यामिन्द्र-सेने-त्युदाहुः ।

तां विद्यां ब्रह्म-योनिग्ं सरूपामि-हायुषे तर्पयामो घृतेन ॥ ४ ॥

दाक्षा-यण्यः सर्व-योन्यः स योन्यः सहस्रशो विश्व रूपा विरूपाः - ।

ससूनवः सपतयः सयुथ्या आयुषेणो घृतमिदं जुषन्ताम् ॥ ५ ॥

दिव्या गणा बहुरूपाः पुराणा आयुश्छिदो नः प्रमथ्नन्तु वीरान् - ।

तेभ्यो जुहोमि बहुधा घृतेन मा नः प्रजग्ं रीरिषो मोत वीरान् - ॥ ६ ॥

एकः पुरस्तत् य इदं बभुव यतो बभुव भुवनस्य गोपाः - ।

यमप्येति भुवनं सांपराये स नो हविर्-घृतमि-हायुषेत्तु देवः ॥ ७ ॥

वसून् रुद्रा-नादित्यान् मरुतोऽथ साध्यान् ऋभून् यक्षान् गन्धर्वा-ग्ग्श्च पितृग्ग्श्च विश्वान् - ।

भृगून् सर्पाग्ग्श्चां-गिरसोऽथ सर्वान् घृतं हुत्वा स्वायुष्य महयाम शश्वत् ॥ ८ ॥

विष्णो त्वं नो अन्तमः शर्म-यच्छ सहन्त्य ।

प्रतेधारा मधुश्चुत उथ्सं दुह्रते अक्षितम् ॥ ९ ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

॥ अक्ष्कीभ्यां ते सूक्तम् ॥

॥ ऋग्वेद संहिता मं - १० । सू - १६३ ॥

अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि ।

यक्ष्मं शीर्षण्यं मस्तिष्का-ज्जिह्वाया वि वृहामि ते ॥

ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात् ।

यक्ष्मं दोषण्य १ मंसाभ्यां बाहुभ्यां वि वृहामि ते ॥

आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्-हृदयादधि ।

यक्ष्मं मतन्साभ्यां यक्नः प्लाशिभ्यो वि वृहामि ते ॥

ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम् ।

यक्ष्मं श्रोणिभ्यां भासदाद्भ्यं-ससो वि वृहामि ते ॥

मेहनाद्वनं-करणा-ल्लोमभ्यस्ते न खेभ्यः ।

यक्ष्मं सर्वस्मादात्म-नस्तमिदं वि वृहामि ते ॥

अङ्गादङ्गा-ल्लोम्नो लोम्नो जातं पर्वणि पर्वणि ।
यक्ष्मं सर्वस्मादात्म-नस्तमिदं वि वृहामि ते ॥
ॐ शान्ति श्शान्ति श्शान्तिः ॥

## १९ हिरण्य गर्भ सूक्तम्

॥ हिरण्यगर्भ सूक्तम् ॥

हिरण्यगर्भः समवर्त-ताग्रे भूतस्य जातः पतिर् एक आसीत् - ।
स दाधार पृथ्इवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥
य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः - ।
यस्य चायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ॥
यः प्राणतो निमिषतो महित्वैक इद् राजा जगतो बभूव ।
य ईशे अस्य द्विपदश् चतुष्पदः कस्मै देवाय हविषा विधेम ॥
यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥
येन द्यौर् उग्रा पृथिवी च दृळ्हा येन स्व स्तभितं येन नाकः ।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ॥
यं क्रन्दसी अवसा तस्तभाने अभ्य् ऐक्षेताम् मनसा रेजमाने ।
यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम ॥
आपो ह यद् बृहतीर् विश्वम् आयन् गर्भं दधाना जनयन्तीर् अग्निम् ।
ततो देवानां सम् अवर्ततासुर् एकः कस्मै देवाय हविषा विधेम ॥

यश् चिद् आपो महिना पर्यपश्यद् दक्षं दधाना जनयन्तीर् यज्ञम् ।
यो देवेष्व् अधि देव एक आसीत् कस्मै देवाय हविषा विधेम ॥
मा नो हिंसीज् जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान ।
यश् चापश् चन्द्रा बृहतीर् जजान कस्मै देवाय हविषा विधेम ॥
प्रजापते न त्वद् एतान्य् अन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास् ते जुहुमस् तन् नो अस्तु वयं स्याम पतयो रयीणाम् ॥
ॐ शान्ति श्शान्ति श्शान्तिः ॥

२० वास्तु सूक्तम्

॥ वास्तु सूक्तम् ॥

वास्तोष्पते प्रति जानी-ह्यस्मान्त्-स्वावेषो अनमीवो भवा नः ।
यत्वेमहे प्रति तन्नो जुषस्व शं न एधि द्विपदे शं चतुष्पदे ॥
वास्तोष्पते शग्मया सग्ंसदा ते सक्षीमहि रङ्वया गतुमत्या ।
आवहः क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः ॥
वास्तोष्पते प्रतरणो न एहि गोभिर्-अश्वे-भिरिन्दो ।
अजरा-शस्ते शख्ये स्याम पितेव पुत्रान्-प्रति नो जुषस्व ॥
अमीवहा वास्तोष्पते विश्वा रूपा-ण्याविशन् ।
सखा सुशेव एधि नः ॥
वास्तु-पुरुषाय विद्महे भूमि-पुत्राय धीमहि ।
तन्नो वास्तुः प्रचोदयात् ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

२१ कुम्भ मन्त्राः

॥ कुम्भ आवाहनम् ॥

ॐ ब्रह्म-जज्ञानं प्रथमं पुरस्तात् द्विसी-मतः सुरुचो वेन अवः ॥

सबुध्निया उपमा अस्य विष्ठाः सतः श्च योनि मसतश्च विवः ॥

नाके सुपर्णमु-पयत्-पतन्तं हृदा वेननोत् अभ्य-चक्षतत्वा ।

हिरण्य-पक्ष वरुणस्य दुतं यमस्य योनौ शकुनं भुरण्युं ॥

आप्ययस्व समेतु ते विश्वतः सोम वृष्णियम् ।

भवा वाजस्य सङ्गथे ॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु ।

यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु ॥

ॐ इदं विष्णुर्-विचक्रमे त्रेधा निदधे पदम् ।

समू-ढमस्य-पागं सुरे ॥

इन्द्रं विश्वा अवी-वृधन्त् समुद्रव्य च सङ्गिरो ।

रथीत-मगं रथीनां वाजानागं सत्पतिं पतिं ॥

ॐ आपो वा इदगं सर्वं विश्वा भूता-न्यापः प्राणा वा आपाः पशव आपोऽन्न-

मापोऽमृत-मापः सम्राडापो विरादापः स्वरादाप-श्छन्दग्ग् ष्यापो-ज्योतीग्ग् ष्यपो

यजूग्ग् ष्यापः सत्यमापः सर्व-देवता आपो भूर् भुवः सुवराप ॐ ॥

ॐ अपः प्रण-यति । श्रद्धा वा आपः । श्रद्धामे-वारभ्य प्रणिय प्रचरति ।

अपः प्रण-यति। यज्ञो वा आपः। यज्ञमे-वारभ्य प्रणिय प्रचरति।

अपः प्रण-यति। वज्रो वा आपः। वज्रमेव भ्रातृव्येभ्यः प्रहृत्य प्रणिय प्रचरति।

अपः प्रण-यति। आपो वै रक्षोघ्नीः ,। रक्षस-मपह-त्यै।

अपः प्रण-यति। आपो वै देवानां प्रियं धाम प्रणीय प्रचरति।

अपः प्रण-यति। आपो वै सर्वा-देवताः। देवत एवारभ्य प्रणीय प्रचरति।

अपः प्रण-यति। अपो वै शान्ताः। शान्तभि-रेवास्य-शुचꣳ शमयति। देवो वः

सवितो-त्पुनात्व-छिद्रेण पवित्रे-णवसोः सूर्यस्य रश्मिभिः॥

ॐ कुर्चाग्रैः राक्षा-सान्घोरान् चिन्दि कर्म-विघातिनः।

त्वामर्-पयामि कुम्भेऽस्मिन् साफल्यं कुरु कर्मणि॥

वृक्षराज-समुद्-भूताः शाखायाः पल्लव-त्वचः।

युष्मान् कुम्भे-ष्वर्पयामि सर्वपापा-पनुत्तये॥

नालि-केर-समुद्-भूत त्रिनेत्र हर सत्तम।

शिखया दुरितं सर्वं पाप पीडां च मे नुद॥

ॐ स हि रत्नानि दाशुषे सुवाति सविता भगः।

तं भागं चित्रमीमहे॥

२२ आप मन्त्राः

इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमꣳ सचता परुष्णिया।

असिक्निया मरुद्वृधे वितस्तयाऽऽर्जीकीये शृणुह्या सुषोमया॥

॥ वरुणावाहनम्॥

इमं मे वरुण श्रुधी हव-मद्या च मृळय ।
वाम पष्युर चक्रे ॥
तत्वा यामि ब्रह्मणा वन्द-मान-स्तदा शास्ते यजामानो हविर्भिः ।
अहे-डमानो वरुणे ह बोध्युरु-शगं स मा न आयुः प्र मोषीः ॥
ॐ दधि-क्राविण्णो अकारिषं जिष्णोर्-अश्वस्य वाजिनः ।
सुरभि नो मुखा करत् प्र ण आयुगंषि तारिषत् ॥
आपो हि ष्टा मयो-भुवस्ता न ऊर्जे दधातन ।
महे रणाय चक्षसे ॥
योवः शिवतमो रसस्तस्य भाजयते-हनः ।
उशतीरिव मातरः ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ ।
आपो जनयथा च नः ॥

## २३ पवमान सूक्तम् (पुण्याहवाचनम्)

॥ पवमान सूक्तम् ( पुण्याहवाचनम् ) ॥

हिरण्य-वर्णाः शुचयः पावका यासु जातः कश्यपो यास्विन्द्रः ।
अग्निं या गर्भं दधिरे विरूपास्ता न आपश्शग्ग् स्योना भवन्तु ॥
यासागं राजा वरुणो याति मध्ये सत्या-नृते अवपश्यं जनानाम् ।
मधु-श्चुतः शुचयो याः पावकास्ता न आपश्शग्ग् स्योना भवन्तु ॥
यासां देवा दिवि कृण्वन्ति भक्शं या अन्तरिक्शे बहुधा भवन्ति ।

याः पृथिवीं पयसोन्-दन्ति शुक्रास्ता न आपश्शग्ग्ं स्योना भवन्तु ॥

शिवेन मा चक्शुषा पश्यताऽ-पश्शिवया तनुवोप स्पृशत त्वचं मे ।

सर्वाग्ं अग्नीग्ं रप्सुषदो हुवे वो मयि वर्चो बलमोजो नि धत्त ॥

पवमानः सुवर्जनः । पवित्रेण विचर्षणिः ।

यः पोता स पुनातु मा । पुनन्तु मा देवजनाः ।

पुनन्तु मनवो धिया । पुनन्तु विश्व आयवः ।

जातवेदः पवित्रवत् । पवित्रेण पुनाहि मा ।

शुक्रेण देवदीद्यत् । अग्ने क्रत्वा क्रतूंरनु ।

यत्ते पवित्र-मर्चिषि । अग्ने वितत-मन्तरा ।

ब्रह्म तेन पुनीमहे । उभाभ्यां देवसवितः ।

पवित्रेण सवेन च । इदं ब्रह्म पुनीमहे ।

वैश्वदेवी पुनती देव्यागात् । यस्यै बह्वी-स्तनुवो वीतपृष्ठाः - ।

तया मदन्तः सध-माद्येषु । वयग्ग्ं स्याम पतयो रयीणाम् ।

वैश्वानरो रश्मिभिर्-मा पुनातु । वातः प्राणे-नेषिरो मयो भूः - ।

द्यावा-पृथिवी पयसा पयोभिः । ऋतावरी यज्ञिये मा पुनीताम् ।

बृहद्-भिः सवित-स्तृभिः । वर्षिष्ठैर्-देव-मन्मभिः ।

अग्ने दक्शैः पुनाहि मा । येन देवा अपुनत ।

येनापो दिव्यं-कशः । तेन दिव्येन ब्रह्मणा ।

इदं ब्रम्ह पुनीमहे । यः पावमानीर्-अध्येति ।

ऋषिभि-स्सम्भृतग्ं रसम्। सर्वग्ं स पूत-मश्नाति।
स्वदितं मातर्-इश्वना। पावमानीर्यो अध्येति।
ऋषिभि-स्सम्भृतग्ं रसम्। तस्मै सरस्वती दुहे।
क्षीरग्ं सर्पिर्-मधू-दकम्॥ पावमानी-स्स्वस्त्ययनीः -।
सुदुघाहि पयस्वतीः -। ऋषिभि-स्सम्भृतो रसः।
ब्राह्मणे-ष्वमृतग्ं हितम्। पावमानीर्-दिशन्तु नः।
इमं लोकमथो अमुम्। कामान्थ्-समर्धयन्तु नः।
देवीर्-देवैः समाभृताः -। पावमानी-स्स्वस्त्ययनीः -।
सुदुघाहि घृत-श्चुतः। ऋषिभि-स्संभृतो रसः।
ब्राह्मणे-ष्वमृतग्ं हितम्। येन देवाः पवित्रेण।
आत्मानं पुनते सदा। तेन सहस्र-धारेण।
पावमान्यः पुनन्तु मा। प्राजापत्यं पवित्रम्।
शतो-ध्यामग्ं हिरण्मयम्। तेन ब्रह्म विदो वयम्।
पूतं ब्रह्म पुनीमहे। इन्द्र-स्सुनीती सहमा पुनातु।
सोम-स्स्वस्त्या वरुण-स्समीच्या। यमो रजा प्रमृ-णाभिः पुनातु मा।
जातवेदा मोर्ज-यन्त्या पुनातु। भूर्भुवस्सुवः।
ॐ तच्छं योरावृणीमहे। गातुं यज्ञाय।
गातुं यज्ञपतये। दैवीस्स्वस्तिरस्तु नः।
स्वस्तिर्-मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम्।

शन्नो अस्तु द्विपदे । शं चतुष्पदे ।

ॐ शान्तिश्शान्तिश्शान्तिः ।

॥ प्रोक्शण मन्त्रः ॥

देवस्य त्वा सवितुः प्रसवे । अश्विनोर्-बाहुभ्याम् ॥ पूष्णो हस्ताभ्यम् । अश्विनोर्-भैषज्येन ।तेजसे ब्रह्मवर्च-साया-भिषिञ्चामि ॥

देवस्य त्वा सवितुः प्रसवे । अश्विनोर्-बाहुभ्यम् । पूष्णो हस्ताभ्याम् । सरस्वत्यै भैषज्येन । वीर्याया-न्नाद्याया-भिषिञ्चामि ॥

देवस्य त्वा सवितुः प्रसवे । अश्विनोर्-बाहुभ्यम् । पूष्णो हस्ताभ्याम् । इन्द्र-स्येंद्रियेण । श्रिये यशसे बलाया-भिषिञ्चामि ॥

देवस्य त्वा सवितुः प्रसवे । अश्विनोर्-बाहुभ्यम् । पूष्णो हस्ताभ्याम् । स्रस्वत्यै वाचो । यन्तुर्-यन्त्रेना-ग्नेस्त्वा साम्राज्येना-भिषिञ्चामि ॥

देवस्य त्वा सवितुः प्रसवे । अश्विनोर्-बाहुभ्यम् । पूष्णो हस्ताभ्याम् । स्रस्वत्यै वाचो । यन्तुर्-यन्त्रेन बृहस्पतेस्त्वा साम्राज्येना-भिषिञ्चामि ॥

द्रुपदादिव मुञ्चतु । द्रुपदादिवेन्-मुमुचानः । स्विन्नः स्नात्वी मलादिव । पूतं पवित्रेणे-वाज्यम् । आप-श्शुन्धन्तु मैनसः ॥

## २४ कपोत सूक्तम्

॥ कपोत सूक्तम् (pigeon suuktam) ॥

देवाः कपोत इषितो यदिच्छन्दूतो निर्ऋत्या इदमा-जगाम ।

तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे ॥

शिवः कपोत इषितो नो अस्त्वनागा देवाः श कुनो गृहेषु ।
अग्निर्हि विप्रो जुषतां हविर्नः परि होतिः पक्षिणी नो वृणक्तु ॥
हेतिः पक्षिणी न दभात्यस्-मानाष्ट्र्यां पदं कृणुते अग्निधाने ।
शं नो गोभ्यश्च पुरुषे-भ्यश्चास्तु मा नो हिंसीदिह देवाः कपोतः ॥
यदुलूको वदति मोघमेत-द्यत्कपोतः पदमग्नौ कृणोति ।
यस्य दूतः प्रहित एष एतत्तस्मै यमाय नमो अस्तु मृत्यवे ॥
ऋचा कपोतं नुदत प्रणोदमिषं मदन्तः परि गां नयध्वम् ।
शंयोपयन्तो दुरितानि विश्वा हित्वा न ऊर्जं प्र पतात्-पतिष्ठः ॥
ॐ शान्ति श्शान्ति श्शन्तिः ॥

## २५ दश दिक्पालका सूक्तम्

॥ दश दिग् पालका सूक्तम् ॥

त्रातार-मिन्द्र मवितार-मिन्द्रग्ं हवे हवे सुहवग्ं शूर-मिन्द्रम् ।
हुवे नु शक्रं पुरु-हूतं इन्द्रग्ग् स्वस्ति नो मघवा धात्विन्द्रः ॥ १ ॥
त्वंनो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यसि-सीष्ठाः - ।
यजिष्ठो वह्नितम श्शोशु-चानो विश्वा द्वेषागंसि प्रमुमुग्-ध्यस्मत् . ॥ २ ॥
सुगन्नः पन्था-मभयं कृणोतु । यस्मि-न्नक्शत्रे यम एति राजा । यस्मि-न्नेन मभ्य-षिञ्चन्त देवाः - । तदस्य चित्रग्ं हविषा यजाम ॥ ३ ॥
असुन्वन्त मयज-मानमिच्च-स्तेन-स्येत्यान्त-स्कर-स्यान्वेषि ।
अन्यमस्म-दिच्छ सा त इत्या नमो देवि निरृते तुभ्यमस्तु ॥ ४ ॥

तत्वा यामि ब्रह्मणा वन्दमान-स्तदा शास्ते यजमानो हविर्भिः।
अहेडमानो वरुनेह-बोध्युरु सग्ंस मा न आयुः प्रमोषीः - ॥ ५॥
आ नो नियुद्भि श्शतिनि-भिरध्वरम्। सह-स्त्रिणीभि रुपयाहि यज्ञम्।
वायो अस्मिन् . हविषि मादयस्व। यूयं पात स्वस्तिभि स्सदा नः॥ ६॥
वयग्ं सोमं व्रते तव। मनस्त-नूषु बिभ्रतः। प्रजावन्तो अशीमहि॥ ७॥
तमीशानं जगत स्तस्थु-षस्पतिम्। धियं जिन्वमवसे हूमहे वयम्। पूषा नो यथा
वेद्-सामस-द्वृधे। रक्षिता पायु रदब्ध स्स्वस्तये॥ ८॥
अस्मे रुद्रा मेहना पर्वतासो वृत्र-हत्ये भर हूतौ सजोषाः।
यश्शंसते स्तुवते धायि पज्र इन्द्र-ज्येष्ठा अस्माग्ं अवन्तु देवाः - ॥ ९॥
स्योना पृथिवी भवा-नृक्षरा निवेशनी।
यच्छा-नश्शर्म सप्रथाः॥ १०॥

२६ नवग्रह सूक्तम्

॥ नवग्रहसूक्तम्॥

॥ नवग्रह सूक्तम्॥

ॐ आसत्येन रजसा वर्तमानो निवेशय-न्नमृतं मर्त्यं च। हिरण्ययेन सविता
रथेनाऽऽदेवो याति भुवना वि॰पश्यन्।
अग्निं दूतं वृणीमहे होतारं विश्व-वेदसम्। अस्य यज्ञस्य सुक्रतुम्" ॥
येषामीशे पशुपतिः पशूनां चतुष्पदा-मुत च द्विपदाम्। निष्क्रीतोऽयं यज्ञियं
भागमेतु रायस्पोषा यजमानस्य सन्तु॥ १॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते

आदित्याय नमः ।

ॐ आप्यायस्व समेतु ते विश्वत-स्सोम वृष्णियम् । भवा वाजस्य संगथे ॥

अप्सुमे सोमो अब्र-वीदन्तर्-विश्वानि भेषजा । अग्निञ्च विश्वशंभुव-मापश्च विश्व-

भेषजीः - ।

गौरी मिमाय सलिलानि तक्श-त्येकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी

बभूवुषी सहस्राक्शरा परमे व्योमन् ॥ २ ॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते

चन्द्राय नमः ।

ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाग् रेतागंसि जिन्वति ।

स्योना पृथिवि भवाऽनृक्शरा निवेशनि । यच्छान-श्शर्म सप्रथाः ॥

क्शेत्रस्य पतिना वयगंहितो नेव जयामसि । गामश्वं पोषयिन्त्वा स नो मृडाती-

दृशे ॥ ३ ॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते

अङ्गारकाय नमः ।

ॐ उद्बुध्य-स्वाग्ने प्रतिजा-गृह्येनमिष्टा-पूर्ते सग्ं-सृजेथा-मयञ्च । पुनः कृण्वग्ग्स्त्वा

पितरं युवानम`न्-वाग्ंसीत्वयि तन्तुमेतम् ॥

इदं विष्णुर्-विचक्रमे त्रेधा निदधे पदम् । समू-ढमस्य-पाग्ं सुरे ॥

विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णो-श्श्नप्त्रेस्थो विष्णो-स्स्यूरसि विष्णोर्-
ध्रुवमसि वैष्णवमसि विष्णवे त्वा ॥ ४ ॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भवगते
बुधाय नमः ।

ॐ बृहस्पते अतियदर्यो अर्हा-द्द्युमद्वि-भाति क्रतुम-ज्जनेषु । यद्दिदय-च्चवसर्त-
प्रजात तद-स्मासु द्रविणन्धेहि चित्रम् ॥

इन्द्रमरुत्व इह पाहि सोमं यथा शार्याते अपिबस्सु-तस्य । तव प्रणीती तव शूर-
शर्म-न्नावि-वासन्ति कवय-सुयज्ञाः ॥

ब्रह्म-जज्ञानं प्रथमं पुरस्ता-द्विसी-मत-स्सुरुचो वेन आवः । सबुध्निया उपमा
अस्य विष्ठा-स्सतश्च योनि-मसतश्च विवः ॥ ५ ॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते
बृहस्पतये नमः ।

ॐ प्रव-श्शुक्राय भानवे भरध्वगं हव्यं मतिं चाग्नये सुपूतम् । यो दैव्यानि मानुषा
जनूग्ंषि अन्तर्-विश्वानि विद्म ना जिगाति ॥

इन्द्राणीमासु नारिषु सुपत्नी-महमश्रवम् । न ह्यस्या अपरंचन जरसा मरते पतिः ॥
इन्द्रं वो विश्वत-स्परि हवामहे जनेभ्यः । अस्मा-कमस्तु केवलः ॥ ६ ॥ ॐ
अधिदेवता प्रत्यधिदेवता सहिताय भगवते
शुक्राय नमः ।

ॐ शन्नो देवी-रभिष्टय आपो भवन्तु पीतये । शंयोर्-अभि-स्त्रवन्तु नः ॥

प्रजापते न त्वदेतन्-यन्यो विश्वा जातानि परिता बभूव। यत्-कामास्ते जुहुमा-

स्तन्नो अस्तु वयग्ग्-स्याम पतयो रयीणाम्।

इमं यम-प्रस्तर-माहि सीदाऽङ्गि-रोभिः पितृभि-स्संविदानः। आत्वा मन्त्राः

कविशस्ता वहन्-त्वेना राजन् हविषा मादयस्व॥ ७॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते

शनै-श्चराय नमः।

ॐ कया नश्चित्र आभु-वदूती सदावृध-स्सखा। कया शचिष्ठया वृता॥

आऽयङ्गौः पृश्निर-क्रमी-दसनन्-मातरं पुनः। पितरञ्च प्रयन्त्-सुवः॥

यत्ते देवी निर्ऋतिर्-आबबन्ध दाम ग्रीवास्व-विचर्त्यम्। इदन्ते तद्विष्या-म्यायुषो

न मध्या-दथाजी-वः पितुमद्धि प्रमुक्तः॥ ८॥ ॐ अधिदेवता प्रत्यधिदेवता

सहिताय भगवते

रहवे नमः।

ॐ केतुङ्-कृण्वन्नके-तवे पेशो मर्या अपेशसे। समुषद्-भिरजायथाः -॥

ब्रह्मा देवानां पदवीः कवीनाम्-ऋषिर्वि-प्राणां महिषो मृगाणाम्। श्येनो-

गृध्राणाग्ग्-स्वधितिर्-वनानागं सोमः पवित्र-मत्येति रेभन्।

सचित्र चित्रं चितयन्-तमस्मे चित्रक्शत्र चित्र-तमं वयोधाम्। चन्द्रं रयिं पुरुवीरम्

बृहन्तं चन्द्र-चन्द्राभिर्-गृणते युवस्व॥ ९॥

ॐ अधिदेवता प्रत्यधिदेवता सहिताय भगवते

केतवे नमः।

२७ नक्षत्र सूक्तम्

॥ नक्षत्र सूक्तम् ॥

अग्निर्नः पातु कृत्तिकाः - । नक्षत्रं देवमिन्-द्रियम् ।
इदमासां विचक्शणम् । हविरासं जुहोतन ।
यस्य भान्ति रश्मयो यस्य केतवः । यस्येमा विश्वा भुवनानि सर्वा ।
स कृत्तिका-भिरभिसं वसानः । अग्निर्नो देव स्सुविते दधातु ॥
प्रजापते रोहिणी-वेतु पत्नी । विश्वरूपा बृहती चित्रभानुः ।
सा नो यज्ञस्य सुविते दधातु । यथा जीवेम शरद स्सवीराः - ।
रोहिणी देव्युदगात्-पुरस्तात् । विश्वा रूपणि प्रति-मोदमाना ।
प्रजापतिग्ं हविषा वर्धयन्ती । प्रिया देवानाम्-उपयातु यज्ञम् ॥
सोमो राजा मृगशीर्षेण आगन्न् । शिवं नक्षत्रं प्रियमस्य धाम ।
आप्याय-मानो बहुधा जनेषु । रेतः प्रजां यजमानो दधातु ।
यत्ते नक्षत्रं मृगशी र्-षमस्ति । प्रियग्ं राजन् प्रियतमं प्रियाणाणाम् ।
तस्मै ते सोम हविषा विधेम । शन्न एधि द्विपदे शं चतुष्पदे ॥
आर्द्रया रुद्रः प्रथमा न एति । श्रेष्ठो देवानां पतिरघ्नि-यानाम् ।
नक्षत्रमस्य हविषा विधेम । मा नः प्रजाग्ं रीरिषन्-मोत वीरान् - ।
हेति रुद्रस्य परिणो वृणक्तु । आर्द्रा नक्षत्रं जुषताग्ं हविर्नः ।
प्रमुञ्चमानौ दुरितानि विश्वा । अपाघशग्ं-सन्नुदता-मरातिम् ॥
पुनर्नो देव्यदिति स्स्पृणोतु । पुनर्-वसूनः पुनरेतां यज्ञम् ।

पुनर्नो देवा अभियन्तु सर्वे । पुनः पुनर्वो हविषा यजामः ।
एवा न देव्यदितिर्-अनर्वा । विश्वस्य भर्त्री जगतः प्रतिष्ठा ।
पुनर्वसू हविषा वर्धयन्ती । प्रियम् देवानाम्-अप्येतु पाथः ॥
बृहस्पतिः प्रथमं जायमानः । तिष्यम् नक्षत्रमभि संबभूव ।
श्रेष्ठो देवानां पृतनासु-जिष्णुः । दिशोऽनु सर्वा अभयन्नो अस्तु ।
तिष्यः पुरस्तादुत मध्यतो नः । बृहस्पतिर्नः परिपातु पश्चात् - ।
बाधेतान्-द्वेषो अभयं कृणुताम् । सुवीर्यस्य पतयस्याम ॥
इदग्ं सर्पेभ्यो हविरस्तु जुष्टम् । आश्रेषा येषामनु-यन्ति चेतः ।
ये अन्तरिक्शं पृथिवीं क्शियन्ति । ते न स्सर्पासो हवमागमिष्ठाः - ।
ये रोचने सूर्यस्यापि सर्पाः - । ये दिवं देवीमनु-सञ्चरन्ति ।
येष-मश्रेषा अनुयन्ति कामम् । तेभ्य स्सर्पेभ्यो मधुम-ज्जुहोमि ॥
उपहूताः पितरो ये मघासु । मनो-जवस स्सुकृत स्सुकृत्याः - ।
ते नो नक्षत्रे हवमा-गमिष्ठाः - । स्वधाबिर्-यज्ञं प्रयतं जुषन्ताम् ।
ये अग्निदग्धा येऽनग्निदग्धाः - । येऽमुल्लोकं पितरः , क्शियन्ति ।
याग्ग्श्च विद्मयाग्ं उ च न प्रविद्म । मघासु यज्ञग्ं सुकृतम् जुषन्ताम् ॥
गवां पतिः फल्गुनी-नामसि त्वम् । तदर्यमन् वरुणमित्र चारु ।
तं त्वा वयग्ं सनितारग्ं सनीनाम् । जीवा जीवन्त-मुप संविशेम ।
येनेमा विश्वा भुवनानि सञ्जिता । यस्य देवा अनु-संयन्ति चेतः ।
अर्यमा राजाऽजरस्तु विष्मान् - । फल्गुनी-नामृषभो रोरवीति ॥

श्रेष्ठो देवानाम् भगवो भगासि। तत्वा विधुः फल्गुनी-स्तस्य वित्तात् -।
अस्मभ्यं क्षत्रम-जरं सुवीर्यम्। गोम-दश्वव-दुप-सन्नुदे ह।
भगोह दाता भग इत्प्रदाता। भगो देवीः फल्गुनी-राविवेश।
भगस्येत्तं प्रसवं गमेम। यत्र देवै स्सधमादं मदेम॥
आयातु देव स्सवितो-पयातु। हिरण्ययेन सुवृता रथेन।
वहन् हस्तं सुभगं विद्म-नापसम्। प्रयच्छन्तं पपुरिं पुण्यमच्छ।
हस्तः प्रयच्छ त्वमृतं वसीयः। दक्षिणेन प्रति-गृभ्णीम एनत्।
दातारमद्य सविता विदेय। यो नो हस्ताय प्रसुवाति यज्ञम्॥
त्वष्टा नक्षत्र-मभ्येति चित्राम्। सुभगं ससंयुवतिं राचमानाम्।
निवेशयन्-नमृतान्-मर्त्यांश्च। रूपाणि पिंशन् भुवनानि विश्वा।
तन्नस्त्वष्टा तदु चित्रा विचष्टाम्। तन्नक्शत्रं भूरिदा अस्तु मह्यम्।
तन्नः प्रजां वीरवतीं सनोतु। गोभिर्नो अश्वै स्समनक्तु यज्ञम्॥
वायुर्-नक्षत्र-मभ्येति निष्ट्याम्। तिग्मशृंगो वृषभो रोरुवाणः।
समीरयन् भुवना मातरिश्वा। अप द्वेषांसि नुदता-मरातीः -।
तन्नो वायस्तदु निष्ट्या शृणोतु। तन्नक्षत्रं भूरिदा अस्तु मह्यम्।
तन्नो देवासो अनुजानन्तु कामम्। यथा तरेम दुरितानि विश्वा॥
दूरमस्म-च्छत्रवो यन्तु भीताह् -। तदिन्द्राग्नी कृणुताम् तद्विशाखे।
तन्नो देवा अनुमदन्तु यज्ञम्। पश्चात् पुरस्ताद-भयन्नो अस्तु।
नक्षत्राणा-मधिपत्नी विशाखे। श्रेष्ठाविन्द्राग्नी भुवनस्य गोपौ।

विषूच-श्शत्रूनप-बाधमानौ। अपक्षुध-न्नुदता-मरातिम्॥
पूर्णा पश्चादुत पूर्णा पुरस्तात्। उन्मध्यतः पौर्णमासी जिगाय।
तस्यां देवा अधिसं-वसन्तः। उत्तमे नाक इह मादयन्ताम्।
पृथ्वी सुवर्चा युवतिः सजोषाः। पौर्णमास्युद-गाच्छो-भमाना।
आप्याययन्ती दुरितानि विश्वा। उरुं दुहां यजमानाय यज्ञम्।
ऋद्ध्यास्म हव्यैर्-नमसो-पसद्य। मित्रं देवं मित्रधेयं नो अस्तु।
अनूराधान् हविषा वर्धयन्तः। शतं जीवेम शरदः सवीराः -।
चित्रम् नक्षत्र-मुदगात्-पुरस्तात्। अनूराधा स इति यद्वदन्ति।
तन्मित्र एति पथिभिर्-देवयानैः। हिरण्ययैर्-विततैर्-अन्तरिक्षे॥
इन्द्रो ज्येष्ठा-मनु नक्षत्रमेति। यस्मिन् वृत्रं वृत्र तूर्ये ततार।
तस्मिन्वय-ममृतं दुहानाः -। क्षुधन्तरेम दुरितिं दुरिष्टिम्।
पुरन्दराय वृषभाय धृष्णवे। अषाढाय सह-मानाय मीढुषे।
इन्द्राय ज्येष्ठा मधुम-द्दुहाना। उरुं कृणोतु यजमानाय लोकम्॥
मूलं प्रजां वीरवतीं विदेय। पराच्येतु निर्ऋतिः पराचा।
गोभिर्-नक्षत्रं पशुभि स्समक्तम्। अहर्भूयाद्य-जमानाय मह्यम्।
अहर्नो अद्य सुविते दधातु। मूलं नक्षत्रमिति यद्वदन्ति।
पराचीं वाचा निर्ऋतिं नुदामि। शिवं प्रजायै शिवमस्तु मह्यम्॥
या दिव्या आपः पयसा सम्बभूवुः। या अन्तरिक्ष उत पार्थिवीर्याः -।
यासाम्-अषाढा अनुयन्ति कामम्। ता न आपः शग्ग् स्योना भवन्तु।

याश्च कूप्या याश्च नाद्या स्समुद्रियाः । याश्च वैशन्ती-रुत प्रासचीर्याः - ।
यासाम्-अषाढा मधु भक्षयन्ति । ता न आपः शग्ग् स्योना भवन्तु ॥
तन्नो विश्वे उप शृण्वन्तु देवाः - । तदषाढा अभिसं-यन्तु यज्ञम् ।
तन्नक्षत्रं प्रथतां पशुभ्यः । कृषिर्-वृष्टिर्-यजमानाय कल्पताम् ।
शुभ्राः कन्या युवतय स्सुपेशसः । कर्मकृत स्सुकृतो वीर्यावतीः - ।
विश्वान् देवान् , हविषा वर्धयन्तीः - । अषाढाः काम-मुपायन्तु यज्ञम् ॥
यस्मिन् ब्रह्मा-भ्यजयत्-सर्वमेतत् . । अमुञ्च लोकमि-दमूच सर्वम् ।
तन्नो नक्षत्र-मभिजि-द्विजित्य । श्रियं दधात्व-हृणीय-मानम् ।
उभौ लोकौ ब्रह्मणा सञ्जितेमौ । तन्नो नक्षत्र-मभिजि-द्विचष्टाम् ।
तस्मिन्-वयं पृतना स्सञ्जयेम । तन्नो देवासो अनुजानन्तु कामम् ॥
शृण्वन्ति श्रोणाम-मृतस्य गोपाम् । पुण्यामस्या उपशृणोमि वाचम् ।
महीं देवीं विष्णुपत्नी-मजूर्याम् । प्रतीची मेनागं हविषा यजामः ।
त्रेधा विष्णु-रुरुगायो विचक्रमे । महीं दिवं पृथिवीम्-अन्तरिक्षम् ।
तच्छ्रोणैति-श्रव इच्छमाना । पुण्यग्ग् श्लोकं यजमानाय कृण्वती ॥
अष्टौ देवा वसवस्सो-म्यासः । चतस्रो देवीर-जराः श्रविष्ठाः - ।
ते यज्ञं पान्तु रजसः पुरस्तात् । संवत्सरीण-ममृतग्ग् स्वस्ति ।
यज्ञं नः पान्तु वसवः पुरस्तात् । दक्षिणतोऽभियन्तु श्रविष्ठाः - ।
पुण्य न्नक्षत्र-मभि संविशाम । मा नो अरातिर्-अघशंसाऽगन्न् ॥
क्शत्रस्य राजा वरुणोऽधिराजः । नक्षत्राणागं शतभिषग्-वसिष्ठः ।

तौ देवेभ्यः कृणुतो दीर्घमायुः। शतं सहस्रा भेषजानि धत्तः।
यज्ञन्नो राजा वरुण उपयातु। तन्नो विश्वे अभि संयन्तु देवाः ।
तन्नो नक्षत्रं शतभिषग्-जुषाणम्। दीर्घमायुः प्रतिरद्-भेषजानि॥
अज एकपा-दुदगात्-पुरस्तात्। विश्वा भूतानि प्रति मोदमानः।
तस्य देवाः प्रसवं यन्ति सर्वे। प्रोष्ठपदासो अमृतस्य गोपाः -।
विभ्राजमान स्समिधा न उग्रः। आऽन्तरिक्ष-मरुह-दगन्द्याम्।
तं सूर्यं देवम-जमेक-पादम्। प्रोष्ठपदासो अनुयन्ति सर्वे॥
अहिर्-बुध्नियः प्रथमा न एति। श्रेष्ठो देवाना-मुत मानुषाणाम्।
तं ब्राह्मणा स्सोमपा स्सोम्यासः। प्रोष्ठपदासो अभिर्-अक्षन्ति सर्वे।
चत्वार एकमभि कर्म देवाः -। प्रोष्ठपदा स इति यान् वदन्ति।
ते बुध्नियं परिषद्यग्ग् स्तुवन्तः। अहिं रक्षन्ति नमसो-पसद्य॥
पूषा रेवत्यन्-वेति पन्थाम्। पुष्टिपती पशुपा वाजबस्त्यौ।
इमानि हव्या प्रयता जुषाणा। सुगैर्नो यानै-रुपयातां यज्ञम्।
क्षुद्रान् पशून् रक्षतु रेवती नः। गावो नो अश्वां अन्वेतु पूषा।
अन्नं रक्षन्तौ बहुदा विरूपम्। वाजं सनुतां यजमानाय यज्ञम्॥
तदश्विना-वश्व-युजो-पयाताम्। शुभङ्-गमिष्ठौ सुयमेभिर्-अश्वैः।
स्वं नक्षत्रं हविषा यजन्तौ। मध्वा-सम्पृक्तौ यजुषा समक्तौ।
यौ देवानां भिषजौ हव्य-वाहौ। विश्वस्य दूत-वमृतस्य गोपौ।
तौ नक्षत्रं जुजुषाणो-पयाताम्। नमोऽश्विभ्यां कृणुमोऽश्वयुग्भ्याम्॥

अप पाप्मानं भरणीर्-भरन्तु । तद्यमो राजा भगवान् , विचष्टाम् ।
लोकस्य राजा महतो महान् हि । सुगं नः पन्था-मभयं कृणोतु ।
यस्मि न्नक्षत्रे यम एति राजा । यस्मि-न्नेनम-भ्यषिंचन्त देवाः - ।
तदस्य चित्रꣳ हविषा यजाम । अप पाप्मानं भरणीर्-भरन्तु ॥
निवेशनी सङ्गमनी वसूनां विश्वा रूपाणि वसून्यावे-शयन्ती ।
सहस्रपोषꣳ सुभगा रराणा सा न आगन्-वर्चसा संविदाना ॥
यत्ते देवा अदधुर्-भाग-धेय-ममावास्ये सं-वसन्तो महित्वा ।
सा नो यज्ञं पिपृहि विश्व-वारे रयिन्नो धेहि सुभगे सुवीरम् ॥

## २८ नासदासीय सूक्तम्

॥ नासदासीय सूक्तम् ॥ ऋग् १० ।१२९ ॥

नासदासीन्नो सदासीत् तदानीं नासीद्रजो नो व्योमा परो यत् ।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरं ॥
न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः ।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः कं चनास ॥
तम आसीत् तमसा गूळ्हनग्रेऽप्रकेतं सलिलं सर्वमा इदम् ।
तुच्छ्येनाभ्वपिहितं यदासीत् तपसस्तन्महिनाजायतैकं ॥
कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् ।
सतो बन्धुम्सति निरविन्दन् हृदि प्रतीप्या कवयो मनीषा ॥
तिरश्चीनो विततो रश्मिरेषा मधः स्विदासी३ दुपरि स्विदासी३त् ।

रेतोधा आसन् महिमान आसन्त्स्वधा अवस्तात् प्रयतिः परस्तात् ॥
को अद्धा वेद क इह प्रचोचत् कुत आजाता कुत इयं विसृष्टिः ।
अर्वाग्देवा अस्य विसर्जनेनाऽथा को वेदयत आबभूव ॥
इयं विसृष्टिर्यति आबभूव यदि वा दधे यदि वा न ।
अस्याध्यक्षः परमे व्योमन्त्सो अञ्ग वेद यदि वा न वेद ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

२९ अग्नि सूक्तम्

॥ अग्नि सूक्तं ॥

ॐ अग्निम् ईळे पुरोहितं यज्ञस्य देवम् ऋत्विजम् ।
होतारं रत्नधातमम् ॥
अग्निः पूर्वेभिर् ऋषिभिर् ईड्यो नूतनैर् उत ।
स देवाएह वक्षति ॥
अग्निना रयिम् अश्नवत् पोषम् एव दिवे-दिवे ।
यशसं वीरवत्तमम् ॥
अग्ने यं यज्ञम् अध्वरं विश्वतः परिभूर् असि ।
स इद् देवेषु गच्छति ॥
अग्निर् होता कविक्रतुः सत्यश् चित्र-श्रवस्तमः ।
देवो देवेभिर् आ गमत् ॥
यद् अङ्ग दाशुषे त्वम् अग्ने भद्रं करिष्यसि ।

तवेत् तत् सत्यम् अङ्गिरः ॥

उप त्वाग्ने दिवे-दिवे दोषावस्तर् धिया वयम् ।

नमो भरन्त एमसि ॥

राजन्तम् अध्वराणां गोपाम् ऋतस्य दीदिविम् ।

वर्धमानं स्वे दमे ॥

स नः पितेव सूनवेऽग्ने सूपायनो भव ।

सचस्वा नः स्वस्तये ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

## ३० पृथिवी सूक्तम्

॥ पृथिवी सूक्तम् ॥ त्ब् २ ।८ ।४ ।६-८ ॥

मही नु द्यावा-पृथिवी इह ज्येष्ठे ।

रुचा भवतागं शुचयद्भिरर्कैः ॥

यत्सीं वरिष्ठे बृहती विमिन्वन् ।

नृवद्धयोऽक्षा पप्रथानो-भिरेवैः ।

प्र पूर्वजे पितरानव्यसीभिः ।

गीर्भिः कृणुध्वगं सदने ऋतस्य ।

आ नो द्यावा-पृथिवी दैव्येन ।

जनेन यातं महि वां व्रूथम् ।

स इमे द्यावा-पृथिवी जजान ।

उर्वी गभीरे रजसी सुमेके ।
अवग्ग्ंशे धीरः शच्या समैरत् ॥
भूरि द्वे अचरन्ती चरन्तम् ।
पद्वन्तं गर्भ-मपदी दधाते ।
नित्यं न सूनुं पित्रोरुपस्थे ।
तं पिपृतग्ं रोदसी सत्यवाचम् ।
इदं द्यावा-पृथिवी सत्यमस्तु ।
पितर्मातर्-यदिहोप-ब्रुवे वाम् ।
भूतं देवाना-मवमे अवोभिः ।
विद्यामेषं वृजनं जीरदानुम् ।
उर्वी पृथ्वी बहुले दूरे अन्ते ।
उपब्रुवे नमसा यज्ञे अस्मिन् ।
दधाते ये सुभगे सुप्रतूर्ती ।
द्यावा रक्षतं पृथिवी नो अभ्वात् ।
ॐ शान्ति श्शान्ति श्शान्तिः

## ३१ ओषधि सूक्तम्

॥ ओषधी सूक्तम् ॥

त्स् ४ । २ । ६

या जाता ओषधयो देवेभ्य-स्त्रियुगं पुरा ।

मन्दामि बभ्रुणा-महग्ं शतं धामानि सप्त च ॥
शतं वो अंब-धामानि सहस्र-मुत वो रुहः ।
अथा शतक्रत्वो यूयमिमं मे अगदं कृत ॥
पुष्पावतीः प्रसूवतीः फलिनी-रफला उत ।
अश्वा इव सजित्व-रीर्वीरुधः पारयिष्णवः ॥
ओषधीरिति मातरस्तद्वो देवीरुप ब्रुवे ।
रपांसि विघ्नतीरित रप-श्चातयमानाः ॥
अश्वत्थे वो निषदनं पर्णे वो वसतिः कृता ।
गोभाज इत्किलाऽसथ यथ्सनवथ पूरुषम् ॥
यदहं वाजयन्निमा ओषधीर्हस्त आदधे ।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥
निष्कृ-तिर्नाम वो माताऽथा यूयग्ग् स्थ संकृतीः ।
सराः पतत्रिणीः स्थन यदा-मयति निष्कृत ॥
अन्या वो अन्याम-वत्वन्या ऽन्यस्या उपा ऽवत ।
ताः सर्वा ओषधयः सं विदाना इदं मे प्रा ऽवता वचः ॥
उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते ।
धनग्ं सनिष्यन्ती-नामात्मानं तव पूरुषा ॥
अति विश्वाः परिष्ठा स्तेन इव व्रजमक्रमुः ।
ओषधयः प्राऽचुच्य-वुर्यत्किं च तनुवां रपः ॥

या- स्त आतस्थु-रात्मानं या आविविशुः परुःपरुः ।
तास्ते यक्ष्मं वि बाधन्ता-मुग्रो मध्यम-शीरिव ॥
साकं यक्ष्म प्र पत श्येनेन किकिदी-विना ।
साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥
अश्वावतीं॑ सोमवती-मूर्जयन्ती-मुदोजसम् ।
आ वित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥
याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पति-प्रसूतास्ता नो मुञ्चन्त्वं॑-हसः ॥
या ओषधयः सोमराज्ञीः प्रविष्टाः पृथिवी-मनु ।
तासां त्वमस्यु-त्तमा प्र णो जीवातवे सुव ॥
अवपतन्ती-रवदन्दिव ओषधयः परि ।
यं जीवमश्न-वामहै न स रिष्याति पूरुषः ॥
याश्चेदमुप-शृण्वन्ति याश्च दूरं परागताः ।
इह संगत्य ताः सर्वा अस्मै सं दत्त भेषजम् ॥
मा वो रिषत्ख-निता यस्मै चाऽहं खनामि वः ।
द्विप-चतुष्पद-स्माकं॑ सर्व-मस्त्वनातुरम् ॥
ओषधयः सं वदन्ते सोमेन सह राज्ञा ।
यस्मै करोति ब्राह्मणस्तं॑ राजन् पारयामसि ॥
ॐ शान्ति श्शान्ति श्शान्तिः ॥

## ३२ पितृ सूक्तम्

॥ पितृ सूक्तम् ॥

॥ यजुर्वेद संहिता २। ६। १२ ॥

उशन्तस्त्वा हवामह उशन्तः समिधीमहि ।
उशन्नुशत आ वह पितॄन् हविषे अत्तवे ॥ १ ॥
त्वꣳ सोम प्रचिकितो मनीष त्वꣳ रजिष्ठमनु रेषि पन्थाम् ।
तव प्रणीती पितरो न इन्द्रो देवेषु रत्नम-भजन्त धीराः ॥ २ ॥
त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः ।
वन्वन्नवातः परिदीꣳ-रपोर्णु वीरेभि-रश्वैर्मघवा भवा नः ॥ ३ ॥
त्वꣳ सोम पितृभिः संविदानोऽनु द्यावा-पृथिवी आ ततन्थ ।
तस्मै त इन्द्रो हविषा विधेम वयꣳग् स्याम पतयो रयीणाम् ॥ ४ ॥
अग्निष्वात्ताः पितर एह गच्छत सदः सदः सदत सुप्रणीतयः ।
अत्ता हवीꣳषि प्रयतानि बर्हिष्यथा रयिꣳ सर्ववीरं दधातन ॥ ५ ॥
बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम् ।
त आ गताऽवसा शंतमेनाऽथाऽस्मभ्यꣳ शं योररपो दधात ॥ ६ ॥
आऽहं पितॄन्थ्सुवि-दत्राꣳ अविथ्सि नपातं च विक्रमणं च विष्णोः ।
बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहाऽऽगमिष्ठाः ॥ ७ ॥
उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु ।
त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु ते अवन्त्वस्मान् ॥ ८ ॥

उदीरता-मवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुर-वृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥ ९॥
इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः ।
ये पार्थिवे रजस्या निषत्ता ये वा नूनꣳ सुवृजनासु विक्षु ॥ १० ॥
अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमा-शुषाणाः ।
शुचीदय-न्दीधिति-मुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन्न् ॥ ११ ॥
यदग्ने कव्यवाहन पितॄन् यक्ष्यृता-वृधः ।
प्र च हव्यानि वक्ष्यसि देवेभ्यश्च पितृभ्य आ ॥ १२ ॥
त्वमग्न ईडितो जातवेदो ऽवाड्ढव्यानि सुरभीणि कृत्वा ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवीꣳषि ॥ १३ ॥
मातली कव्यैर्यमो अङ्गिरोभिर्-बृहस्पतिर्-ऋक्वभिर्वा-वृधानः ।
याग्ꣳ-श्च देवा वावृधुर्ये च देवान्थ्स्वाहान् ये स्वधयाऽन्ये मदन्ति ॥ १४ ॥
इमं यम प्रस्तरमा हि सीदाङ्गि-रोभिः पितृभिः संविदानः ।
आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व ॥ १५ ॥
अङ्गिरोभिरा गहि यज्ञियेभिर्-यम वैरूपैरिह मादयस्व ।
विवस्वन्तꣳ हुवे यः पिता तेऽस्मिन् यज्ञे बर्हिष्या निषद्य ॥ १६ ॥
अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयꣳ सुमतौ यज्ञियाना-मपि भद्रे सौमनसे स्याम ॥ १७ ॥
शान्ति श्शान्ति श्शान्तिः ॥

३३ मृत्तिक सूक्तम्

॥ मृत्तिक सूक्तम् ॥

भूमिर्-धेनुर्धरणी लोकधारिणि । उद्धृताऽसि वराहेण कृष्णेन शत-बाहुना । मृत्तिकेहन मे पापं यन्मया दुष्कृतं कृतम् । मृत्तिके ब्रह्मदत्ताऽसि काश्यपेना-भिमन्त्रिता । मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् ॥ मृत्तिके प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके । तया हतेन पापेन गच्छामि परमां गतिम् ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

३४ गो सूक्तम्

॥ गौ सूक्तम् ॥

ईग्वेद संहीता ६ । २८ ॥

आ गावो अग्मन्न् उत भद्रम् अक्रन् सीदन्तु गोष्ठे रणयन्त्व् अस्मे । प्रजावतीः पुरुरूपा इह स्युर् इन्द्राय पूर्वीर् उषसो दुहानाः - ॥
इन्द्रो यज्वने पृणते च शिक्षत्य् उपेद् ददाति न स्वम् मुषायति । भूयोभूयो रयिम् इद् अस्य वर्धयन्न् अभिन्ने खिल्ये नि दधाति देवयुम् ॥ न ता नशन्ति न दभाति तस्करो नासाम् आमित्रो व्यथिर् आ दधर्षति । देवाँश् च याभिर् यजते ददाति च ज्योग् इत् ताभिः सचते गोपतिः सह ॥ न ता अर्वा रेणुककाटो अश्नुते न संस्कृतत्रम् उप यन्ति ता अभि । उरुगायम् अभयं तस्य ता अनु गावो मर्तस्य वि चरन्ति यज्वनः ॥ गावो भगो गाव इन्द्रो मे अच्छान् गावः सोमस्य प्रथमस्य भक्षः ।

इमा या गावः स जनास इन्द्र इच्छामीद् धृदा मनसा चिद् इन्द्रम् ॥ यूयं गावो मेदयथा कृशं चिद् अश्रीरं चित् कृणुथा सुप्रतीकम् । भद्रं गृहं कृणुथ भद्रवाचो बृहद् वो वय उच्यते सभासु ॥ प्रजावतीः सूयवसं रिशन्तीः शुद्धा अपः सुप्रपाणे पिबन्तीः ।

मा व स्तेन ईशत माघशंसः परि वो हेती रुद्रस्य वृज्याः - ॥ उपेदम् उप-पर्चनम् आसु गोषूप पृच्यताम् ।

उप ऋषभस्य रेतस्य् उपेन्द्र तव वीर्ये ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

## ३५ श्रद्धा सूक्तम्

॥ श्रद्धा सूक्तम् ॥

ऋग् संहिता १० । १५१ ॥

श्रद्धा कामायनी ऋषि । श्रद्धा देवता । अनुष्टुप् छन्द ॥

श्रद्धयाग्निः समिध्यते श्रधया हूयते हविः ।

श्रद्धां भगस्य मूर्धनि वचसा वेदयामसि ॥

प्रियं श्रद्धे ददतः प्रियं श्रद्धे दिदासतः ।

प्रियं भोजेषु यज्वस्विदं म उदितं कृधि ॥

यथा देवा असुरेषु श्रद्धा-मुग्रेषु चक्रिरे ।

एवं भोजेषु यज्वस्व-स्माक-मुदितं कृधि ॥

श्रद्धां देवा यजमाना वायुगोपा उपासते ।

श्रद्धां हृदय्य१ याकूत्या श्रद्धया विन्दते वसु ॥

श्रद्धां प्रातर्-हवामहे श्रद्धां मध्यंदिनं परि ।

श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

## ३६ विवाह सूक्तम्

॥ विवह सूक्तम् ॥

सत्येनो-त्तभिता भूमिः सूर्येणोत्तभिता द्यौः - ।

ऋतेनादित्यास् तिष्ठन्ति दिवि सोमो अधि श्रितः ॥

सोमेनादित्या बलिनः सोमेन पृथिवी मही ।

अथो नक्षत्राणाम् एषाम् उपस्थे सोम आहितः ॥

सोमम् मन्यते पपिवान् यत् सम्पिंषन्त्य् ओषधिम् ।

सोमं यम् ब्रह्माणो विदुर् न तस्याश्नाति कश् चन ॥

आच्छद्वि-धानैर् गुपितो बार्हतैः सोम रक्षितः ।

ग्राव्णाम् इच् छृण्वन् तिष्ठसि न ते अश्नाति पार्थिवः ॥

यत् त्वा देव प्रपिबन्ति तत आ प्यायसे पुनः ।

वायुः सोमस्य रक्षिता समानाम् मास आकृतिः ॥

रैभ्य् आसीद् अनुदेयी नाराशंसी न्योचनी ।

सूर्याया भद्रम् इद् वासो गाथयैति परिष्कृतम् ॥

चित्तिर् आ उपबर्हणं चक्षुर् आ अभ्यञ्जनम् ।

द्यौर् भूमिः कोश आसीद् यद् अयात् सूर्या पतिम् ॥

स्तोमा आसन् प्रतिधयः कुरीरं छन्द ओपशः ।

सूर्याया अश्विना वराग्निर् आसीत् पुरोगवः ॥

सोमो वधूयुर् अभवद् अश्विनास्ताम् उभा वरा ।

सूर्यां यत् पत्ये शंसन्तीम् मनसा सवितादद्दात् - ॥

मनो अस्या अन आसीद् द्यौर् आसीद् उत च्छदिः ।

शुक्राव् अनड्वाहाव् आस्तां यद् अयात् सूर्या गृहम् ॥

ऋक्सामाभ्याम् अभिहितौ गावौ ते सामनाव् इतः ।

श्रोत्रं ते चक्रे आस्तां दिवि पन्थाश् चराचारः ॥

शुची ते चक्रे यात्या व्यानो अक्ष आहतः ।

अनो मनस्मयं सूर्यारोहत् प्रयती पतिम् ॥

सूर्याया वहतुः प्रागात् सविता यम् अवासृजत् ।

अघासु हन्यन्ते गावो ऽर्जुन्योः पर्य् उह्यते ॥

यद् अश्विना पृच्छमानाव् अयातं त्रिचक्रेण वहतुं सूर्यायाः ।

विश्वे देवा अनु तद् वाम् अजानन् पुत्रः पितराव् अवृणीत पूषा ॥

यद् अयातं शुभस् पती वरेयं सूर्याम् उप ।

क्वैकं चक्रं वाम् आसीत् क्व देष्ट्राय तस्थथुः ॥

द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः ।

अथैकं चक्रं यद् गुहा तद् अद्धातय इद् विदुः ॥

सूर्यायै देवेभ्यो मित्राय वरुणाय च ।
ये भूतस्य प्रचेतस इदं तेभ्यो ऽकरं नमः ॥
पूर्वापरं चरतो माययैतौ शिशू क्रीळन्तौ परि यातो अध्वरम् ।
विश्वान्य् अन्यो भुवनाभिचष्ट ऋतूँर् अन्यो विदधज् जायते पुनः ॥
नवो-नवो भवति जायमानो ऽह्नां केतुर् उषसाम् एत्य् अग्रम् ।
भागं देवेभ्यो वि दधात्य् आयन् प्र चन्द्रमास् तिरते दीर्घम् आयुः ॥
सुकिंशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम् ।
आ रोह सूर्ये अमृतस्य लोकं स्योनम् पत्ये वहतुं कृणुष्व ॥
उद् ईर्ष्वातः पतिवती ह्य् एऽ३ षा विश्वावसुं नमसा गीर्भिर् ईळे ।
अन्याम् इच्छ पितृषदं व्यक्तां स ते भागो जनुषा तस्य विद्धि ॥
उद् ईर्ष्वातो विश्वावसो नमसेळा महे त्वा ।
अन्याम् इच्छ प्रफर्व्य१ं सं जायाम् पत्या सृज ॥
अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्ति नो वरेयम् ।
सम् अर्यमा सम् भगो नो निनीयात् सं जास्पत्यं सुयमम् अस्तु देवाः - ॥
प्र त्वा मुञ्चामि वरुणस्य पाशाद् येन त्वाबध्नात् सविता सुशेवः ।
ऋतस्य योनौ सुकृतस्य लोके ऽरिष्टां त्वा सह पत्या दधामि ॥
प्रेतो मुञ्चामि नामुतः सुबद्धाम् अमुतस् करम् ।
यथेयम् इन्द्र मीढ्वः सुपुत्रा सुभगासति ॥
पूषा त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन ।

गृहान् गच्छ गृहपत्नी यथासो वशिनी त्वं विदथम् आ वदासि ॥

इह प्रियम् प्रजया ते सम् ऋध्यताम् अस्मिन् गृहे गार्हपत्याय जागृहि ।

एना पत्या तन्वꣳ सं सृजस्वाधा जिव्री विदथम् आ वदाथः ॥

नीललोहितम् भवति कृत्यासक्तिर् व्य् अज्यते ।

एधन्ते अस्या ज्ञातयः पतिर् बन्धेषु बध्यते ॥

परा देहि शामुल्यम् ब्रह्मभ्यो वि भजा वसु ।

कृत्यैषा पद्वती भूत्व्य् आ जाया विशते पतिम् ॥

अश्रीरा तनूर् भवति रुशती पापयामुया ।

पतिर् यद् वध्वो३ वाससा स्वम् अङ्गम् अभिधित्सते ॥

ये वध्वश् चन्द्रं वहतुं यक्ष्मा यन्ति जनाद् अनु ।

पुनस् तान् यज्ञिया देवा नयन्तु यत आगताः - ॥

मा विदन् परिपन्थिनो य आसीदन्ति दम्पती ।

सुगेभिर् दुर्गम् अतीताम् अप द्रान्त्व् अरातयः ॥

सुमङ्गलीर् इयं वधूर् इमां समेत पश्यत ।

सौभाग्यम् अस्यै दत्त्वायाथास्तं वि परेतन ॥

तृष्टम् एतत् कटुकम् एतद् अपाष्ठवद् विषवन् नैतद् अत्तवे ।

सूर्यां यो ब्रह्मा विद्यात् स इद् वाधूयम् अर्हति ॥

आशसनं विशसनम् अथो अधिविकर्तनम् ।

सूर्यायाः पश्य रूपाणि तानि ब्रह्मा तु शुन्धति ॥

गृभ्णामि ते सौभगत्वाय हस्तम् मया पत्या जरदष्टिर् यथासः ।
भगो अर्यमा सविता पुरंधिर् मह्यं त्वादुर् गार्हपत्याय देवाः - ॥

ताम् पूषञ् छिवतमाम् एरयस्व यस्याम् बीजम् मनुष्याऽ३ वपन्ति ।
या न ऊरू उशती विश्रयाते यस्याम् उशन्तः प्रहराम शेपम् ॥

तुभ्यम् अग्रे पर्य् अवहन् सूर्यां वहतुना सह ।
पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ॥

पुनः पत्नीम् अग्निर् अदाद् आयुषा सह वर्चसा ।
दीर्घायुर् अस्या यः पतिर् जीवाति शरदः शतम् ॥

सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः ।
तृतीयो अग्निष् टे पतिस् तुरीयस् ते मनुष्यजाः - ॥

सोमो ददद् गन्धर्वाय गन्धर्वो ददद् अग्नये ।
रयिं च पुत्राँश् चादाद् अग्निर् मह्यम् अथो इमाम् ॥

इहैव स्तम् मा वि यौष्टं विश्वम् आयुर् व्य् अश्नुतम् ।
क्रीळन्तौ पुत्रैर् नप्तृभिर् मोदमानौ स्वे गृहे ॥

आ नः प्रजां जनयतु प्रजापतिर् आजरसाय सम् अनक्त्व् अर्यमा ।
अदुर्मङ्गलीः पतिलोकम् आ विश शं नो भव द्विपदे शं चतुष्पदे ॥

अघोरचक्षुर् अपतिघ्न्य् एधि शिवा पशुभ्यः सुमनाः सुवर्चाः ।
वीरसूर् देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥

इमां त्वम् इन्द्र मीढ्वः सुपुत्रां सुभगां कृणु ।

दशास्याम् पुत्रान् आ धेहि पतिम् एकादशं कृधि ॥

सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वाम् भव ।

ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥

सम् अञ्जन्तु विश्वे देवाः सम् आपो हृदयानि नौ ।

सम् मातरिश्वा सं धाता सम् उ देष्ट्री दधातु नौ ॥

३७ शिव सङ्कल्पाः

अथ शिवसङ्कल्पः

ॐ येनेदं भूतं भुवनं भविष्यत् परि-गृहीतम्-आमृतेन सर्वम् ।

येन यज्ञस्त्रायते सप्तहोत तन्मे मनः शिव-सङ्कल्पमस्तु ॥

येन कर्माणि प्रचरन्ति धीरा यतो वाचा मनसा चारुयन्ति ।

यत्सम्मितं मनः संचरन्ति प्राणिन स्तन्मे मनः शिव-सङ्कल्पमस्तु ॥

येन कर्माण्-यपसो मनीषिणो यज्ञे शृण्वन्ति विदथेषु धीराः ।

यद्-पूर्वं यत्क्षमन्तं प्रजानां तन्मे मनः शिव-सङ्कल्पमस्तु ॥

यत्प्रज्ञान मुत चेतो धृतिश्च यज्जोति रत्न-रमृतं प्रजासु ।

यस्मान्न ईते किञ्चन कर्म क्रियते तन्मे मनः शिव-सङ्कल्पमस्तु ॥

सुषार-थिरश्वनि वयं मनुष्यान्मे नियुते पशुभित्-वाजिनीवान् ।

हृत्प्रविष्टं यदचरं यविष्ठं तन्मे मनः शिव-सङ्कल्पमस्तु ॥

यस्मि-न्नृचसामा-यजूंषि यस्मिन्-प्रतिष्ठा रशना-भाविभाराः ।

यस्मिग्ग्-श्चित्तं सर्व-मोतं प्रजानान् तन्मे मनः शिव-सङ्कल्पमस्तु ॥

यदत्र षष्ठं त्रिशतꣳ सुवीर्यं यज्ञस्य गुह्यं नव-नाव माय्यम् ।
दश पञ्च त्रिꣳशतं यत्परं तन्मे मनः शिव-सङ्कल्पमस्तु ॥
यज्जाग्रतो दूर-मुदैति सर्वं तत्सुप्तस्य तथैवेति ।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिव-सङ्कल्पमस्तु ॥
येनेदं विश्वं जगतो बभूव ये देववि-महतो जातवेदः - ।
तदेवाग्नि-स्तद्वाऽयुस्तत्-सूर्य-स्तदु चन्द्रमा स्तन्मे मनः शिव-सङ्कल्पमस्तु ॥
येन द्यौः पृथिवी चान्तरिक्षं च ये पर्वताः प्रदिशो दिशश्च ।
येनेदं जगद्व्याप्तं प्रजानां तन्मे मनः शिव-सङ्कल्पमस्तु ॥
ये मनो हृदयं ये च देवा ये दिव्या आपो ये सूर्यरश्मिः ।
ते श्रोत्रे चक्षुषी सञ्चरन्तं तन्मे मनः शिव-सङ्कल्पमस्तु ॥
अचिन्त्यं चा प्रमेयं च व्यक्ता-व्यक्त परं च यत् ।
सूक्ष्मात् सूक्ष्मतरं ज्ञेयं तन्मे मनः शिव-सङ्कल्पमस्तु ॥
एका च दश शतं च सहस्रं चायुतं च ।
नियतं च प्रयुतं चार्बुदं च न्यर्बुदं च समुद्रश्च मध्यं चान्तश्च परार्धश्च तन्मे मनः
शिव-सङ्कल्पमस्तु ॥
ये पञ्च पञ्चादश शतꣳ सहस्र-मयुत-न्न्यर्बुदं च ।
ये अग्निचित्ते-ष्टकस्ताꣳ शरीरं तन्मे मनः शिव-सङ्कल्पमस्तु ॥
वेदा-हमेतं पुरुषं महान्तं आदित्य-वर्णं तमसः परस्तात् ।
यस्य योनिन् परि-पश्यन्ति धीरा स्तन्मे मनः शिव-सङ्कल्पमस्तु ॥

यस्यैतं धीरः पुनन्ति कवयो ब्रह्माण-मेतं त्वा वृणु-तमिन्दुम् ।
स्थावरं जङ्गमं द्यौराकाशं तन्मे मनः शिव-सङ्कल्पमस्तु ॥
परात्-परतरं ब्रह्म तत्परात्-परतो हरिः ।
यत्परात्-परतोऽधीशं तन्मे मनः शिव-सङ्कल्पमस्तु ॥
परत्-परतरं चैव तत्परा चैव यत्परम् ।
यत्परत्-परतो ज्ञेयं तन्मे मनः शिव-सङ्कल्पमस्तु ॥
या वेदादिषु गायत्री सर्व-व्यापी महेश्वरी ।
ऋग्यजुः सामाथर्वैश्च तन्मे मनः शिव-सङ्कल्पमस्तु ॥
यो वै देवं महादेवं प्रायुतः प्रणवः शुचिः ।
यः सर्वे सर्ववेदैश्च तन्मे मनः शिव-सङ्कल्पमस्तु ॥
प्रयतः प्रणवों-कारं प्रणवं पुरुषोत्तमम् ।
ॐकारं प्रणवात्मानं तन्मे मनः शिव-सङ्कल्पमस्तु ॥
योऽसौ सर्वेषु वेदेषु पठ्यते ह्यय-मीश्वरः ।
अकायो निर्गुणो ह्यात्मा तन्मे मनः शिव-सङ्कल्पमस्तु ॥
गो भिर्जुष्टं धनेन ह्यायुषा च बलेन च ।
प्रजया पशुभिः पुष्कराक्षं तन्मे मनः शिव-सङ्कल्पमस्तु ॥
त्र्यम्बकं यजामहे सुगन्धिं पुष्टि-वर्धनम् ।
उर्वा-रुकमिव बन्धनान्-मृत्योर् मुक्षीय माऽमृतात् तन्मे मनः शिव-सङ्कल्पमस्तु ॥
कैलास-शिखरे रम्ये शन्करस्य शिवालये ।

देवतास्तत्र मोदन्ति तन्मे मनः शिव-सङ्कल्पमस्तु ॥

कैलास शिखरा वासं हिमवद्-गिरिगङ्चया ।

नीलकण्ठं त्रिनेत्रें च तन्मे मनः शिव-सङ्कल्पमस्तु ॥

विश्वत-श्चक्षुरुत विश्वतो मुखो विश्वतो हस्त उत विश्वतस्पात् - ।

सम्बाहुभ्या-न्नमति सम्पत त्रैर्द्यावा-पृथिवी जनयन् देव एक स्तन्मे मनः शिव-

सङ्कल्पमस्तु ॥

चतुरो वेदान धीयीत् सर्वशास्त्रमयं विदुः ।

इतिहास-पुराणानान् तन्मे मनः शिव-सङ्कल्पमस्तु ॥

मा नो महान्त-मुत मा नो अर्भकं मा न उक्षन्त-मुत मा न उक्षितम् ।

मा नोऽवधीः पितरं मोत मातरं प्रिया मानस्तनुवो रुद्र रीरिष स्तन्मे मनः शिव-

सङ्कल्पमस्तु ॥

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।

वीरान् मा नो रुद्र भामितोऽवधिर्-हविश्मन्तो नमसा विधेम ते तन्मे मनः शिव-

सङ्कल्पमस्तु ॥

ऋतं सत्यं परं ब्रह्म पुरुषं कृष्ण पिङ्गलम् ।

ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नम स्तन्मे मनः शिव-सङ्कल्पमस्तु ॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम शन्तमं हृदे । सर्वो ह्येष रुद्रस्तस्मै

रुद्राय नमो अस्तु तन्मे मनः शिव-सङ्कल्पमस्तु ॥

ब्रह्मजज्ञानं प्रथमं पुरस्ता-द्विसी-मतः सुरुचो वेन आवः ।

स बुध्निया उपमा अस्य विष्ठाः सतश्च योनि-मसतश्च विव स्तन्मे मनः शिव-सङ्कल्पमस्तु ॥

यः प्राणतो निमिषतो महित्-वैक इद्राजा जगतो बभुव ।
य ईषे अस्य द्विपदश्-चतुष्पद् कस्मै देवाय हविषा विधेम तन्मे मनः शिव-सङ्कल्पमस्तु ॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः - ।
यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम तन्मे मनः शिव-सङ्कल्पमस्तु ॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना-विवेश तस्मै रुद्राय नमो अस्तु तन्मे मनः शिव-सङ्कल्पमस्तु ॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीगं सर्व भुतानां तामि-होपह्वये श्रियं तन्मे मनः शिव-सङ्कल्पमस्तु ॥

नमकं चमकं चैव पुरुष-सूक्तं च यद्वीदुः ।
महादेवं च तत्तुल्यं तन्मे मनः शिव-सङ्कल्पमस्तु ॥

य इदगं शिव-सङ्कल्पगं सदा ध्यायन्ति ब्रह्मणाः - ।
ते परं मोक्षं गमिष्यन्ति तन्मे मनः शिव-सङ्कल्पमस्तु ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

## ३८ भद्र सूक्तम्

॥ आ नो भद्राः सूक्तम् ॥

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः।

देवा नो यथा सदम् इद् वृधे असन्न् अप्रायुवो रक्षितारो दिवे-दिवे॥

देवानाम् भद्रा सुमतिर् ऋजूयतां देवानां रातिर् अभि नो नि वर्तताम्।

देवानां सख्यम् उप सेदिमा वयं देवा न आयुः प्र तिरन्तु जीवसे॥

तान् पूर्वया निविदा हूमहे वयम् भगम् मित्रम् अदितिं दक्षम् अस्रिधम्।

अर्यमणं वरुणं सोमम् अश्विना सरस्वती नः सुभगा मयस् करत्॥

तन् नो वातो मयोभु वातु भेषजं तन् माता पृथिवी तत् पिता द्यौः ,।

तद् ग्रावाणः सोमसुतो मयोभुवस् तद् अश्विना शृणुतं धिष्ण्या युवम्॥

तम् ईशानं जगतस् तस्थुषस् पतिं धियंजिन्वम् अवसे हूमहे वयम्।

पूषा नो यथा वेदसाम् असद् वृधे रक्षिता पायुर् अदब्धः स्वस्तये॥

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।

स्वस्ति नस् तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर् दधातु॥

पृषदश्वा मरुतः पृश्निमातरः शुभं यावानो वि-दथेषु जग्मयः।

अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्न् इह॥

भद्रं कर्णेभिः शृणुयाम देवा भद्रम् पश्येमाक्षभिर् यजत्राः ,।

स्थिरैर् अङ्गैस् तुष्टुवांसस् तनूभिर् व्य् अशेम देवहितं यद् आयुः॥

शतम् इन् नु शरदो अन्ति देवा यत्रा नश् चक्रा जरसं तनूनाम्।पुत्रासो यत्र पितरो

भवन्ति मा नो मध्या रीरिषतायुर् गन्तोः॥

अदितिर् द्यौर् अदितिर् अन्तरिक्षम् अदितिर् माता स पिता स पुत्रः।

विश्वे देवा अदितिः पञ्च जना अदितिर् जातम् अदितिर् जनित्वम् ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

## ३९ ब्रह्म सूक्तम्

॥ ब्रह्म सूक्तम् ॥

ब्रह्म-जज्ञानं प्रथमं पुरस्तात् । वि सीमतः सुरुचो वेन आवः ।

स बुध्निया उपमा अस्य विष्ठाः - । सतश्च योनि-मसतश्च विवः ॥

पिता विराजाम्-ऋषभो रयीणाम् - । अन्तरिक्षं विश्वरूप आविवेश ।

तमर्कै-अभ्यर्चन्ति वथ्सम् । ब्रह्म सन्तं ब्रह्मणा वर्धयन्तः ॥

ब्रह्म देवान-जनयत् । ब्रह्म विश्वमिदं जगत् ।

ब्रह्मणः, क्षत्रं निर्मितम् । ब्रह्म ब्राह्मण आत्मना ॥

अन्तरस्मि-न्निमे लोकाः - । अन्तर्विश्वमिदं जगत् ।

ब्रह्मैव भूतानां ज्येष्ठम् । तेन कोऽरहति स्पर्धितुम् ॥

ब्रह्मन् देवा-स्त्रय-स्त्रिंशत् । ब्रह्म-न्निन्द्र प्रजापति ।

ब्रह्मन् ह विश्वा भूतानि । नावीवान्तः समाहिता ॥

चतस्र आशाः प्रचरन्-त्वग्नयः । इमं नो यज्ञं नयतु प्रजानन्न् ।

घृतं पिन्व-न्नजरं सुवीरम् । ब्रह्म समिद्-भव-त्याहुतीनाम् - ॥

## ४० मन्त्र पुष्पम्

॥ मन्त्र पुष्पम् ॥

योऽपां पुष्पं वेद । पुष्पवान् प्रजावान् पशुमान् भवति । चन्द्रमा वा अपां पुष्पम् ।
पुष्पवान् प्रजावान् पशुमान् भवति । य एवं वेद । योऽपामायतनं वेद ।
आयतनवान् भवति ॥ १ ॥ अग्निर्वा अपामायतनम् । आयतनवान् भवति ।
योऽग्नेरायतनं वेद । आयतनवान् भवति । आपो वा अग्नेरायतनम् । आयतनवान्
भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ २ ॥ वायुर्वा
अपामायतनम् । आयतनवान् भवति । यो वायोरायतनं वेद । आयतनवान् भवति ।
आपो वै वायोरायतनम् ।
आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ ३ ॥
असौ वै तपन्नपामायतनम् । आयतनवान् भवति । योऽमुष्य तपत आयतनं वेद ।
आयतनवान् भवति । आपो वा अमुष्य तपत आयतनम् । आयतनवान् भवति । य
एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ ४ ॥ चन्द्रमा वा
अपामायतनम् । आयतनवान् भवति । यश्चन्द्रमस आयतनं वेद । आयतनवान्
भवति । आपो वै चन्द्रमस आयतनम् । आयतनवान् भवति । य एवं वेद ।
योऽपामायतनं वेद । आयतनवान् भवति ॥ ५ ॥ नक्शत्राणि वा अपामायतनम् ।
आयतनवान् भवति । यो नक्शत्राणा-मायतनं वेद । आयतनवान् भवति । आपो वै
नक्शत्राणा-मायतनम् । आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद ।
आयतनवान् भवति ॥ ६ ॥ पर्जन्यो वा अपामायतनम् । आयतनवान् भवति । यः
पर्जन्यस्यायतनं वेद । आयतनवान् भवति । आपो वै पर्जन्यस्याऽऽयतनम् ।
आयतनवान् भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान् भवति ॥ ७ ॥

संवत्सरो वा अपामायतनम् । आयतनवान् भवति । यस्संवत्सरस्यायतनं वेद । आयतनवान् भवति । आपो वै संवत्सरस्यायतनम् । आयतनवान् भवति । य एवं वेद । योऽप्सु नावं प्रतिष्ठितां वेद । प्रत्येव तिष्ठति ॥ ८ ॥

राजाधिराजाय प्रसह्य साहिने ।

नमो वयं वैश्रवणाय कुर्महे ।

स मे कामान् काम कामाय मह्यं ।

कामेश्वरो वै श्रवणो ददतु ।

कुबेराय वै श्रवणाय ।

महाराजाय नमः ॥

ओं तद्ब्रह्म । ओं तद्वायुः । ओं तदात्मा । ओं तत्सत्यम् । ओं तत्सर्वम् । ओं तत्पुरोर्-नमः ॥ अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु । त्वं यज्ञस्त्वं वषट्-कारस्त्वम्-इन्द्रस्त्वꣳ रुद्रस्त्वं विष्णुस्त्वं ब्रह्म त्वं प्रजापतिः । त्वं तदाप आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः सुवरोम् ॥

## ४१ संन्यासी सूक्तम्

॥ संन्यासी सूक्तं ॥

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्व-मानसुः ।

परेण नाकं निहितं गुहायां विभ्राजदे-तद्-यतयो विशन्ति ॥

वेदान्त-विज्ञान सुनिश्चितार्थाः संन्यास योगाद्-यतय-शुद्ध-सत्त्वाः ।

ते ब्रह्म-लोके तु परान्त-काले परामृतात्-परिमुच्यन्ति सर्वे ॥

दह्रं विपापं परमेऽश्म भूतं यत्-पुण्डरीकं पुर-मध्य-सग्गस्थम्।
तत्रापि दह्रं गगनं विशोकस्-तस्मिन् यद्-अन्तस्-तद्-उपासितव्यम्॥
यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः।
तस्य प्रकृति-लीनस्य यः पर-स महेश्वरः॥
ॐ शान्ति श्शान्ति श्शान्तिः॥

## ४२ आशीर्वाद मन्त्राः

॥ आशीर्वाद मन्त्रम्॥

नवोनवो भवति जायमानोऽह्नां केतुरु-षसामेत्-यग्रे।
भागं देवेभ्यो वि दधा-त्यायन् प्र चंद्रमा-स्तिरति दीर्घमायुः॥
शत-मानं भवति शतायुः पुरुषश्श-तेन्द्रिय आयुष्ये-वेन्द्रिये प्रति-तिष्ठति॥
सुमङ्ग-लीरियं वधू-रिमागं समेत-पश्यत।
सौभा-ग्यमस्यै दत्वा याथास्तं विपरे-तन॥
इमां त्वम्-इन्द्रमी-ढ्वस्सु-पुत्रग्ं सुभगां कुरु।
दशास्यां पुत्राना-धेहि पतिम्-एकादशं कृधि॥
क्षत्रस्य राजा वरुणोऽधिराजः। नक्षत्रा-णाग्ं शत-भिषग्-वसिष्ठः। तौ देवेभ्यः कृणुतो दीर्घमायुः॥
शताय स्वाहेत्याह। शतायुर्वै पुरुश-ष्षतवीर्यः। आयुरेव वीर्यम-वरुन्धे।
सहस्राय-स्वाहेत्याह। आयुर्वै सहस्रं। आयुरेवा वरुन्धे। सर्वस्मै स्वाहेत्याह।
अपरि-तमेवा वरुन्धे॥

श्रेयो-वसीय आयध्-सम्भूतं भूतं। चित्रः केतुः प्रभा नाभान्-ध्सम्भान्।
ज्योतिश्-मागस्तेज-स्वानात-पगस्त पन्न-भितपन्। रोचनो रोचमानश्-
शोभनश्-शोभमानः कल्याणः॥
श्री-वर्चस्य-मायुष्य-मारोग्यमाविधात् शोभमानं महीयते।
धान्यं धनं पशुं बहुपुत्रलभं शतसंवत्सरं दीघमायुः॥
४३ चतुर्वेद परायणम्
॥ वेद पारायणम्॥
हरिः ॐ
अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्न-धातमम्॥ हरिः ॐ हरिः ॐ॥
इषेत्वोर्-जे त्वा वायवः-स्थोपा-यवः-स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय
कर्मणे॥ हरिः ॐ हरिः ॐ॥
अग्न आयाहि वीतये गृणानो हव्य-दातये।
नि होता सत्सि बर्हिषि॥ हरिः ॐ हरिः ॐ॥
शन्नो देवि रभिष्टय आपो-भवन्तु पीतये।
शं यो रभि स्रवन्तु नः॥ हरिः ॐ हरिः ॐ॥
स विष्णुरेव भवति स विष्णु रेव भवति। ओमित्यग्रे व्याहरेत् -। नम इति पश्चात्
-। नारायणा-येत्युपरिष्टात् -। ओमित्ये-काक्षरम्। नम इति द्वे अक्षरे। नारायणा
येति पञ्चाक्षराणि। एतद्वै नारायण-स्याष्टाक्षरं पदम्। यो ह वै नारायण-स्याष्टाक्षरं

पद्-मध्येति। अनु-पब्रुव स्सर्व-मायुरेति। विन्दते प्राजापत्यग् रायस्पोषं गौपत्यम्। ततोऽमृतत्व-मश्नुते ततोऽमृतत्व-मश्नुत इतृइ। य एवं वेद। इत्युपनिषत्. ॥ हरिः ओं ॥

४४ शिवोपासन मन्त्राः

॥ शिवोपासन मन्त्राः ॥

ॐ निधन-पतये नमः। ॐ निधन-पतान्तिकाय नमः।

ॐ ऊर्ध्वाय नमः। ॐ ऊर्ध्व-लिङ्गाय नमः।

ॐ हिरण्याय नमः। ॐ हिरण्य-लिङ्गाय नमः

ॐ सुवर्णाय नमः। ॐ सुवर्ण-लिङ्गाय नमः।

ॐ दिव्याय नमः। ॐ दिव्य-लिङ्गायनमः।

ॐ भवाय नमः। ॐ भव-लिङ्गाय नमः।

ॐ शर्वाय नमः। ॐ शर्व-लिङ्गाय नमः।

ॐ शिवाय नमः। ॐ शिव-लिङ्गाय नमः।

ॐ ज्वलाय नमः। ॐ ज्वल-लिङ्गाय नमः।

ॐ आत्माय नमः। ॐ आत्म-लिङ्गाय नमः।

ॐ परमाय नमः। परम-लिङ्गाय ॐ नमः।

एतत् सोमस्य सूर्यस्य। सर्व-लिङ्गग्म्।

स्थापयति। पाणि-मन्त्रं पवित्रम्॥

ॐ सद्योजातं प्रपद्यामि सद्योजाताय- वै नमो नमः।

भवे भवे नाति भवे भवस्वमां । भवोद्भवाय नमः ॥ (West)

वामदेवाय नमो ज्येष्ठाय नमश्-श्रेष्ठाय नमो रुद्राय नमः ।

कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस्। सर्वभूतदमनय नमो मनोन्मनाय नमः ॥ (North)

अघोरेभ्योऽथ घोरेभ्यो घोर-घोर-तरेभः ।

सर्वेभ्यस्-सर्वसर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥ (South)

तत्-पुरुषाय विद्महे महादेवाय धीमहि ।

तन्नो रुद्रः प्रचोदयात्॥ (East)

ईशानस्-सर्व-विद्यान-मीश्वरस्-सर्व-भूतानाम्।

ब्रह्मा-धिपतिर्-ब्रह्मणोऽधिपतिर्-ब्रह्मा शिवो मे अस्तु सदा-शिवोम्॥ (Center: This form of Lord Shiva is said to face upwards)

नमो हिरण्य-बाहवे हिरण्य-वर्णाय हिरण्य-रूपाय ।

हिरण्य-पतयेऽम्बिका-पतय उमापतये पशु-पतये नमो नमः ॥

ऋतं सत्यं परं ब्रह्म पुरुषं कृष्ण-पिङ्गलम्।

ऊर्ध्वरेतं विरूपाक्षं विश्व-रूपाय वै नमो नमः ॥

सर्वो वै रुद्र-स्तस्मै रुद्राय नमो अस्तु। पुरुषो वै रुद्र-स्सन्महो नमो नमः। विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्। सर्वो ह्येष रुद्र-स्तस्मै रुद्राय नमो अस्तु ॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे। वो चेम शन्तमं हृदे। सर्वो ह्येष रुद्र-स्तस्मै रुद्राय नमो अस्तु ॥

## ४५ सर्प सूक्तम्

॥ सर्प सूक्तम् ॥

नमो अस्तु सर्पेभ्यो ये के च पृथिवी-मनु ।
ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥
येऽदोरोचने दिवो ये वा सूर्यस्य रश्मिषु ।
येषामप्सु सदः कृतं तेभ्यः सर्पेभ्यो नमः ॥
या इषवो यातु-धानानां ये वो वनस्पतिगं्-रनु ।
ये वाऽवटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥
इदग्ं सर्पेभ्यो हविरस्तु जुष्टम् ।
आश्रेषा येषामनु-यन्ति चेतः ।
ये अन्तरिक्षं पृथिवीं क्षियन्ति ।
ते नः सर्पासो हवमागमिष्ठाः ॥
ये रोचने सूर्यस्यापि सर्पाः ।
ये दिवं देवीमनु संचरन्ति ।
येषामाश्रेषा अनुयन्ति कामम् ।
तेभ्यः सर्पेभ्यो मधु-मज्जुहोमि ॥
निघृष्वैर-समायुतैः - । कालैर् हरित्व-मापन्नैः - ।
इन्द्रा-या हि सहस्रयुक्, । अग्निर्-विभ्राष्टि-वसनः, ।
वायुः श्वेत-सिकद्रुकः । संवथ्सरो विषू-वर्णैः ।

नित्या-स्तेऽनुचरास्तव ॥

सुब्रह्मण्योगं सुब्रह्मण्योगं सुब्रह्मण्यों ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

४६ पञ्चामृत मन्त्राः

॥ पञ्चामृतम् ॥

॥ दधि ॥

दधि-क्राविण्णो अकारिषं जिष्णोर्-अश्वस्य वाजिनः ।
सुरभि नो मुखा करत्-प्र ण आयुगंषि तारिषत् . ॥
आ दधिक्राः शवसा पञ्चकृष्टीः सूर्य इव ज्योतिषा पस्ततान ।
सहस्त्रसाः शतसा वाजर्वा पृणक्तु मध्वा-समिमिमा वचाग्ंसि ॥

॥ मधु ॥

मधु वाता ऋतायते मधु क्षरन्ति सैन्धवः । मध्वीन स्सन्तो-षधीः - ॥ मधुनक्त-
मुतोषसि मधु-मत्पाथिवगं राजः । मधु द्यौरस्तु नः पिता ॥ मधु-मन्नो वनस्पतिर्-
मधु-मागं सतु सूरयः । माध्वीर्गवो भवन्तु नः ॥

॥ त ॥

शुक्रमसि ज्योतिरसि तेजोसि देवो वः सवितोत्-पुनात्व-च्छिद्रेण पवित्रेण वसोः
सूर्यस्य रश्मिभिः ॥

॥ शर्कर ॥

स्वादुः पवस्व दिव्याय जन्मने स्वादुर्-इन्द्राय सुहवी-तुनाम्ने ।

स्वादुर्-मित्राय वरुणाय वायवे बृहस्पतये मधुमाग्ं अदाभ्यः ॥

॥ क्षीर ॥

आप्यायस्व समेतु ते विश्वत स्सोम वृष्णियम् ।
भवा वाजस्य संगथे ॥

॥ शुद्ध जाल ॥

ॐ भूर् भुव स्सुवः । ॐ तत् सवितुर् वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥

४७ पञ्चगव्य मन्त्राः

॥ पञ्च गव्यम् ॥

॥ दधि ॥

दधि-क्राविण्णो अकारिषं जिष्णोर्-अश्वस्य वाजिनः ।
सुरभि नो मुखा करत्-प्र ण आयुग्ंषि तारिषत् ॥

आ दधिक्राः शवसा पञ्चकृष्टीः सूर्य इव ज्योतिषा पस्ततान ।
सहस्रसाः शतसा वाजर्वा पृणक्तु मध्वा-समिमिमा वचाग्ंसि ॥

॥ त ॥

शुक्रमसि ज्योतिरसि तेजोसि देवो वः सवितोत्-पुनात्व-च्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः ॥

॥ गौमय च ॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।

ईश्वरीं सर्व भूतानां तामि-होपह्वये श्रियम् ॥

॥ गौ मुत्र ॥

ॐ भूर् भुव स्सुवः। ॐ तत् सवितुर् वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॥

॥ क्षीर ॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्य१ स्मज्जुहुरा-णमेनो भूयिष्ठान्ते नम उक्तिं विधेम ॥

॥ दर्भै (darbha water) ॥

(no mantra)
(while consuming)

यतवगस्ति गदं पापं देह-तिष्ठति मोमहेम्।
प्राशनं पञ्च गव्यश्च दधतु अग्निरि-वेन्धनम् ॥

४८ मधु सूक्तम्

॥ मधु सूक्तं ॥

ऋजुनीती नो वरुणो मित्रो नयतु विद्वान् -।
अर्यमा देवैः सजोषाः ॥
ते हि वस्वो वसवानास् ते अप्रमूरा महोभिः।
व्रता रक्षन्ते विश्वाहा ॥
ते अस्मभ्यं शर्म यंसन्न् अमृता मर्त्येभ्यः।
बाधमाना अप द्विषः ॥
वि नः पथः सुविताय चियन्त्व् इन्द्रो मरुतः।

पूषा भगो वन्द्यासः ॥
उत नो धियो गो-अग्राः पूषन् विष्णव् एवयावः ।
कर्ता नः स्वस्तिमतः ॥
मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
मध्वीनः सन्त्वोषधीः - ॥
मधु-नक्त-मुतोषसि मधु-मत्पार्थिवग॰ रजः ।
मधु द्यौरस्तु नः पिता ॥
मधु-मन्नो वनस्पतिर्-मधुमाग॰ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥
मधु मधु मधु
शं नो मित्रः शं वरुणः शं नो भवत्व् अर्यमा ।
शं न इन्द्रो बृहस्पतिः शं नो विष्णुर् उरुक्रमः ॥

## ४९ ज्ञान सूक्तम्

बृहस्पते प्रथमं वाचो अग्रं यत् प्रैरत नामधेयं दधानाः - ।
यद् एषां श्रेष्ठं यद् अरिप्रम् आसीत् प्रेणा तद् एषां निहितं गुहाविः ॥
सक्तुम् इव तित पुना पुनन्तो यत्र धीरा मनसा वाचम् अक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर् निहिताधि वाचि ॥
यज्ञेन वाचः पदवीयम् आयन् ताम् अन्व् अविन्दन्न् ऋषिषु प्रविष्टाम् - ।
ताम् आभृत्या व्य् अदधुः पुरुत्रा तां सप्त रेभा अभि सं नवन्ते ॥

उत त्वः पश्यन् न ददर्श वाचम् उत त्वः शृण्वन् न शृणोत्य् एनाम् ।
उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासा-ः ॥
उत त्व-ं सख्ये स्थिरपी-तम् आहुर् नैन-ं हिन्वन्त्य् अपि वाजिनेषु ।
अधे-न्वा चरति माययैष वाच-ं शुश्रुवाँ अफलाम् अपुष्पाम् ॥
यस् तित्याज सचिविदं सखायं न तस्य वाच्य् अपि भागो अस्ति ।
यद् ईं शृणोत्य् अलकं शृणोति नहि प्रवेद सुकृतस्य पन्थाम् ॥
अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्व् असमा बभूवुः ।
आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे ॥
हृदा तष्टेषु मनसो जवेषु यद् ब्राह्मणाः संयजन्ते सखायः ।
अत्राह त्वं वि जहुर् वेद्याभिर् ओहब्रह्माणो वि चरन्त्य् उ त्वे ॥
इमे ये नार्वाङ् न परश् चरन्ति न ब्राह्मणासो न सुतेकरासः ।
त एते वाचम् अभिपद्य पापया सिरीस् तन्त्रं तन्वते अप्रजज्ञयः ॥
सर्वे नन्दन्ति यशसागतेन सभासाहेन सख्या सखायः ।
किल्बिषस्पृत् पितुषणिर् ह्य् एषाम् अरं हितो भवति वाजिनाय ॥
ऋचां त्वः पोषम् आस्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु ।
ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः ॥

५० नेत्रोन्मीलनम् मन्त्राः

(Right eye honey)

ऋग् १ - ११५ - १ ॥

चित्रं देवनां उदगा-दनीकं चक्षुर्-मित्रस्य वरुणस्याग्नेः ।

आप्रा द्यावा-पृथिवी अन्तरिक्षं सूर्य आत्मा जगत-स्तस्थु-षश्च ॥

(Left eye ghee)

ऋग् ७ - ६६ - १६६ ॥

तच्चक्षुर्-देवहितं शुक्र-मुच्चरत् ।

पश्येम शरदः शतं जीवेम शरदः शतं ॥

(Apply a~njanam)

ऋग् २ । २७ । ९ - १५ ॥

त्री रोचना दिव्या धारयन्त हिरन्ययाः शुचयो धारपूताः ।

अस्वप्नजो अनिमिषा अदब्धा उरुशंसा ऋजवे मर्त्याय ॥

ऋग् १० । १५८

चक्षुर् नो देवः सविता चक्षुर् न उत पर्वतः ।

चक्षुर् धाता दधातु नः ॥

चक्षुर् नो धेहि चक्षुषे चक्षुर् विख्यै तनूभ्यः ।

सं चेदं वि च पश्येम ॥

सुसंदृशं त्वा वयम् प्रति पश्येम सूर्य ।

वि पश्येम नृचक्षसः ॥

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।

दिवीव चक्शु-राततम् ।

ॐ शान्ति श्शान्ति श्शान्तिः ॥

५१ रक्षोघ्न सूक्तम्

॥ रक्षोघ्न सूक्तम् ॥

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजे-वामवाँ इभेन ।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षस-स्तपिष्ठैः - ॥
तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शोशुचानः ।
तपुंष्यग्ने जुह्वा पतङ्गा-नसन्दितो वि सृज विष्व-गुल्काः - ॥
प्रति स्पशो वि सृज तूर्णितमो भवा पायुर् विशो अस्या अदब्धः ।
यो नो दूरे अघशंसो यो अन्त्य् अग्ने माकिष् टे व्यथिर् आ दधर्षीत् - ॥
उद् अग्ने तिष्ठ प्रत्य् आ तनुष्व न्य् अ१ मित्राँ ओषतात् तिग्महेते ।
यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्य् अतसं न शुष्कम् ॥
ऊर्ध्वो भव प्रति विध्याध्य् अस्मद् आविष् कृणुष्व दैव्यान्य् अग्ने ।
अव स्थिरा तनुहि यातुजूनां जामिम् अजामिम् प्र मृणीहि शत्रून् ॥
स ते जानाति सुमतिं यविष्ठ य ईवते ब्रह्मणे गातुम् ऐरत् ।
विश्वान्य् अस्मै सुदिनानि रायो द्युम्नान्य् अर्यो वि दुरो अभि द्यौत् ॥
सेद् अग्ने अस्तु सुभगः सुदानुर् यस् त्वा नित्येन हविषा य उक्थैः - ।
पिप्रीषति स्व आयुषि दुरोणे विश्वेद् अस्मै सुदिना सासद् इष्टिः ॥
अर्चामि ते सुमतिं घोष्य् अर्वाक् सं ते वावाता जरताम् इयं गीः - ।
स्वश्वास् त्वा सुरथा मर्जये-मास्मे क्षत्राणि धारयेर् अनु द्यून् - ॥
इह त्वा भूर्य् आ चरेद् उप त्मन् दोषा-वस्तर् दीदिवांसम् अनु द्यून् ।
क्रीळन्तस् त्वा सुमनसः सपेमाभि द्युम्ना तस्थिवांसो जनानाम् ॥
यस् त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन ।

तस्य त्राता भवसि तस्य सखा यस् त आतिथ्यम् आनुषग् जुजोषत् . ॥
महो रुजामि बन्धुता वचोभिस् तन् मा पितुर् गोतमाद् अन्व् इयाय ।
त्वं नो अस्य वचसश् चिकिद्धि होतर् यविष्ठ सुक्रतो दमूनाः - ॥
अस्वप्नजस् तरणयः सुशेवा अतन्द्रासो ऽवृका अश्रमिष्ठाः - ।
ते पायवः सध्र्यञ्चो निषद्याग्ने तव नः पान्त्व् अमूर ॥
ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरिताद् अरक्षन् - ।
ररक्ष तान् सुकृतो विश्ववेदा दिप्सन्त इद् रिपवो नाह देभुः ॥
त्वया वयं सधन्य१ स्त्वोतास् तव प्रणीत्य् अश्याम वाजान् . ।
उभा शंसा सूदय सत्यताते ऽनुष्ठुया कृणुह्य् अह्रयाण ॥
अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय ।
दहाशसो रक्षसः पाह्य् अ१ स्मान् द्रुहो निदो मित्रमहो अवद्यात् - ॥
रक्षोहणं वाजिनम् आ जिघर्मि मित्रम् प्रथिष्ठम् उप यामि शर्म ।
शिशानो अग्निः क्रतुभिः समिद्धः स नो दिवा स रिषः पातु नक्तम् ॥
अयो दंष्ट्रो अर्चिषा यातुधानान् उप स्पृश जातवेदः समिद्धः ।
आ जिह्वया मूरदेवान् रभस्व क्रव्यादो वृक्त्व्य् अपि धत्स्वासन् ॥
उभोभयाविन्न् उप धेहि दंष्ट्रा हिंस्रः शिशानो ऽवरम् परं च ।
उतान्तरिक्षे परि याहि राजञ् जम्भैः सं धेह्य् अभि यातुधानान् . ॥
यज्ञैर् इषूः संनममानो अग्ने वाचा शल्याँ अशनिभिर् दिहानः ।
ताभिर् विध्य हृदये यातुधानान् प्रतीचो बाहून् प्रति भङ्ध्य् एषाम् ॥

अग्ने त्वचं यातुधानस्य भिन्धि हिंस्राशनिर् हरसा हन्त्व् एनम् ।
प्र पर्वाणि जातवेदः शृणीहि क्रव्यात् क्रविष्णुर् वि चिनोतु वृक्णम् ॥
यत्रेदानीम् पश्यसि जातवेदस् तिष्ठन्तम् अग्न उत वा चरन्तम् ।
यद् वान्तरिक्षे पथिभिः पतन्तं तम् अस्ता विध्य शर्वा शिशानः ॥
उतालब्धं स्पृणुहि जातवेद आलेभानाद् ऋष्टिभिर् यातुधानात् . ।
अग्ने पूर्वो नि जहि शोशुचान आमादः क्ष्विङ्कास् तम् अदन्त्व् एनीः . ॥
इह प्र ब्रूहि यतमः सो अग्ने यो यातुधानो य इदं कृणोति ।
तम् आ रभस्व समिधा यविष्ठ नृचक्षसश् चक्षुषे रन्धयैनम् ॥
तीक्ष्णेनाग्ने चक्षुषा रक्ष यज्ञम् प्राञ्चं वसुभ्यः प्र णय प्रचेतः ।
हिंस्रं रक्षांस्य् अभि शोशुचानम् मा त्वा दभन् यातुधाना नृचक्षः ॥
नृचक्षा रक्षः परि पश्य विक्षु तस्य त्रीणि प्रति शृणीह्य् अग्रा ।
तस्याग्ने पृष्टीर् हरसा शृणीहि त्रेधा मूलं यातुधानस्य वृश्च ॥
त्रिर् यातुधानः प्रसितिं त एत्व् ऋतं यो अग्ने अनृतेन हन्ति ।
तम् अर्चिषा स्फूर्जयञ् जातवेदः समक्षम् एनं गृणते नि वृङ्ग्धि ॥
तद् अग्ने चक्षुः प्रति धेहि रेभे शफारुजं येन पश्यसि यातुधानम् ।
अथर्ववज् ज्योतिषा दैव्येन सत्यं धूर्वन्तम् अचितं न्य् ओष ॥
यद् अग्ने अद्य मिथुना शपातो यद् वाचस् तृष्टं जनयन्त रेभाः - ।
मन्योर् मनसः शरव्या३ जायते या तया विध्य हृदये यातुधानान् . ॥
परा शृणीहि तपसा यातुधानान् पराग्ने रक्षो हरसा शृणीहि ।

परार्चिषा मूरदेवाञ् छृणीहि परासुतृपो अभि शोशुचानः ॥
पराद्य देवा वृजिनं शृणन्तु प्रत्यग् एनं शपथा यन्तु तृष्टाः - ।
वाचास्तेनं शरव ऋच्छन्तु मर्मन् विश्वस्यैतु प्रसितिं यातुधानः ॥
यः पौरुषेयेण क्रविषा समङ्क्ते यो अश्व्येन पशुना यातुधानः ।
यो अघ्न्याया भरति क्षीरम् अग्ने तेषां शीर्षाणि हरसापि वृश्च ॥
संवत्सरीणम् पय उस्रियायास् तस्य माशीद् यातुधानो नृचक्षः ।
पीयूषम् अग्ने यतमस् तितृप्सात् तम् प्रत्यञ्चम् अर्चिषा विध्य मर्मन् . ॥
विषं गवां यातुधानाः पिबन्त्व् आ वृश्च्यन्ताम् अदितये दुरेवाः ।
परैनान् देवः सविता ददातु परा भागम् ओषधीनां जयन्ताम् - ॥
सनाद् अग्ने मृणसि यातुधानान् न त्वा रक्षांसि पृतनासु जिग्युः ।
अनु दह सहमूरान् क्रव्यादो मा ते हेत्या मुक्षत दैव्यायाः ॥
त्वं नो अग्ने अधराद् उदक्तात् त्वम् पश्चाद् उत रक्षा पुरस्तात् . ।
प्रति ते ते अजरासस् तपिष्ठा अघशंसं शोशुचतो दहन्तु ॥
पश्चात् पुरस्ताद् अधराद् उदक्तात् कविः काव्येन परि पाहि राजन् - ।
सखे सखायम् अजरो जरिम्णे ऽग्ने मर्ताँ अमर्त्यस् त्वं नः ॥
परि त्वाग्ने पुरं वयं विप्रं सहस्य धीमहि ।
धृषद्वर्णं दिवे-दिवे हन्तारम् भङ्गुरावताम् ॥
विषेण भङ्गुरावतः प्रति ष्म रक्षसो दह ।
अग्ने तिग्मेन शोचिषा तपुरग्राभिर् ऋष्टिभिः ॥

प्रत्य् अग्ने मिथुना दह यातुधाना किमीदिना ।
सं त्वा शिशामि जागृह्य् अदब्धं विप्र मन्मभिः ॥
प्रत्य् अग्ने हरसा हरः शृणीहि विश्वतः प्रति ।
यातुधानस्य रक्षसो बलं वि रुज वीर्यम् ॥
इन्द्रासोमा तपतं रक्ष उब्जतं न्य् अर्पयतं वृषणा तमोवृधः ।
परा शृणीतम् अचितो न्य् ओषतं हतं नुदेथां नि शिशीतम् अत्रिणः ॥
इन्द्रासोमा सम् अघशंसम् अभ्य् अ१ घं तपुर् ययस्तु चरुर् अग्निवाँ इव ।
ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तम् अनवायं किमीदिने ॥
इन्द्रासोमा दुष्कृतो वव्रे अन्तर् अनारम्भणे तमसि प्र विध्यतम् ।
यथा नातः पुनर् एकश् चनोदयत् तद् वाम् अस्तु सहसे मन्युमच् छवः ॥
इन्द्रासोमा वर्तयतं दिवो वधं सम् पृथिव्या अघशंसाय तर्हणम् ।
उत् तक्षतं स्वर्य१म् पर्वतेभ्यो येन रक्षो वावृधानं निजूर्वथः ॥
इन्द्रासोमा वर्तयतं दिवस् पर्य् अग्नितप्तेभिर् युवम् अश्महन्मभिः ।
तपुर्वधेभिर् अजरेभिर् अत्रिणो नि पर्शाने विध्यतं यन्तु निस्वरम् ॥
इन्द्रासोमा परि वाम् भूतु विश्वत इयम् मतिः कक्ष्याश्वेव वाजिना ।
यां वां होत्राम् परिहिनोमि मेधयेमा ब्रह्माणि नृपतीव जिन्वतम् ॥
प्रति स्मरेथां तुजयद्भिर् एवैर् हतं द्रुहो रक्षसो भङ्गुरावतः ।
इन्द्रासोमा दुष्कृते मा सुगम् भूद् यो नः कदा चिद् अभिदासति द्रुहा ॥
यो मा पाकेन मनसा चरन्तम् अभिचष्टे अनृतेभिर् वचोभिः ।

आप इव काशिना संगृभीता असन्न् अस्त्व् आसत इन्द्र वक्ता ॥
ये पाकशंसं विहरन्त एवैर् ये वा भद्रं दूषयन्ति स्वधाभिः ।
अहये वा तान् प्रददातु सोम आ वा दधातु निर्ऋतेर् उपस्थे ॥
यो नो रसं दिप्सति पित्वो अग्ने यो अश्वानां यो गवां यस् तनूनाम् ।
रिपु स्तेन स्तेयकृद् दभ्रम् एतु नि ष हीयतां तन्वा३ तना च ॥
परः सो अस्तु तन्वा३ तना च तिस्रः पृथिवीर् अधो अस्तु विश्वाः ।
प्रति शुष्यतु यशो अस्य देवा यो नो दिवा दिप्सति यश् च नक्तम् ॥
सुविज्ञानं चिकितुषे जनाय सच् चासच् च वचसी पस्पृधाते ।
तयोर् यत् सत्यं यतरद् ऋजीयस् तद् इत् सोमो ऽवति हन्त्य् आसत् . ॥
न वा उ सोमो वृजिनं हिनोति न क्षत्रियम् मिथुया धारयन्तम् ।
हन्ति रक्षो हन्त्य् आसद् वदन्तम् उभाव् इन्द्रस्य प्रसितौ शयाते ॥
यदि वाहम् अनृतदेव आस मोघं वा देवाँ अप्यूहे अग्ने ।
किम् अस्मभ्यं जातवेदो हृणीषे द्रोघवाचस् ते निर्ऋथं सचन्ताम् ॥
अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस् ततप पूरुषस्य ।
अधा स वीरैर् दशभिर् वि यूया यो मा मोघं यातुधानेत्य् आह ॥
यो मायातुं यातुधानेत्य् आह यो वा रक्षाः शुचिर् अस्मीत्य् आह ।
इन्द्रस् तं हन्तु महता वधेन विश्वस्य जन्तोर् अधमस् पदीष्ट ॥
प्र या जिगाति खर्गलेव नक्तम् अप द्रुहा तन्वं१ गूहमाना ।
वव्राँ अनन्ताँ अव सा पदीष्ट ग्रावाणो घ्नन्तु रक्षस उपब्दैः - ॥

वि तिष्ठध्वम् मरुतो विक्ष्व् इ१ च्छत गृभायत रक्षसः सम् पिनष्टन ।
वयो ये भूत्वी पतयन्ति नक्तभिर् ये वा रिपो दधिरे देवे अध्वरे ॥
प्र वर्तय दिवो अश्मानम् इन्द्र सोमशितम् मघवन् सं शिशाधि ।
प्राक्ताद् अपाक्ताद् अधराद् उदक्ताद् अभि जहि रक्षसः पर्वतेन ॥
एत उ त्ये पतयन्ति श्वयातव इन्द्रं दिप्सन्ति दिप्सवो ऽदाभ्यम् ।
शिशीते शक्रः पिशुनेभ्यो वधं नूनं सृजद् अशनिं यातुमद्भ्यः ॥
इन्द्रो यातूनाम् अभवत् पराशरो हविर्मथीनाम् अभ्य् आ३ विवासताम् - ।
अभीद् उ शक्रः परशुर् यथा वनम् पात्रेव भिन्दन् सत एति रक्षसः ॥
उलूकयातुं शुशुलूकयातुं जहि श्वयातुम् उत कोकयातुम् ।
सुपर्णयातुम् उत गृध्रयातुं दृषदेव प्र मृण रक्ष इन्द्र ॥
मा नो रक्षो अभि नड् यातुमावताम् अपोच्छतु मिथुना या किमीदिना ।
पृथिवी नः पार्थिवात् पात्व् अंहसो ऽन्तरिक्षं दिव्यात् पात्व् अस्मान् - ॥
इन्द्र जहि पुमांसं यातुधानम् उत स्त्रियम् मायया शाशदानाम् ।
विग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन् सूर्यम् उच्चरन्तम् ॥
प्रति चक्ष्व वि चक्ष्वेन्द्रश् च सोम जागृतम् ।
रक्षोभ्यो वधम् अस्यतम् अशनिं यातुमद्भ्यः ॥
अग्ने हंसि न्य् अ१ त्रिणं दीद्यन् मर्त्येष्व् आ ।
स्वे क्षये शुचिव्रत ॥
उत् तिष्ठसि स्वाहुतो घृतानि प्रति मोदसे ।

यत् त्वा स्रुचः समस्थिरन् - ॥
स आहुतो वि रोचते ऽग्निर् ईळेन्यो गिरा ।
स्रुचा प्रतीकम् अज्यते ॥
घृतेनाग्निः सम् अज्यते मधुप्रतीक आहुतः ।
रोचमानो विभावसुः ॥
जरमाणः सम् इध्यसे देवेभ्यो हव्यवाहन ।
तं त्वा हवन्त मर्त्याः ॥
तम् मर्ता अमर्त्यं घृतेनाग्निं सपर्यत ।
अदाभ्यं गृहपतिम् ॥
अदाभ्येन शोचिषाग्ने रक्षस् त्वं दह ।
गोपा ऋतस्य दीदिहि ॥
स त्वम् अग्ने प्रतीकेन प्रत्य् ओष यातुधान्यः ।
उरुक्षयेषु दीद्यत् ॥
तं त्वा गीर्भिर् उरुक्षया हव्यवाहं सम् ईधिरे ।
यजिष्ठम् मानुषे जने ॥
ब्रह्मणाग्निः संविदानो रक्षोहा बाधता मितः ।
अमीवा यस्ते गर्भं दुर्णामा योनिमाशये ॥
यस्ते गर्भममीवा दुर्णामा योनिमाशये ।
अग्निष्टं ब्रह्मणा सह निष्क्रव्या-दमनी-नशात् ॥

यस्ते हन्ति पतयन्तं निषत्स्नुं यः सरीसृपम्।
जातं यस्ते जिघांसति तमितो नाशयामसि॥
यस्त ऊरू विहरत्यन्-तरा दम्पती शये।
योनिं यो अन्तरा-रेळ्हि तमितो नाशयाम्सि॥
यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपध्यते।
प्रजां यस्ते जिघांसति तमितो नाशयामसि॥
यस्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते।
प्रजां यस्ते जिघांसति तमितो नाशयामसि॥
उदीरता-मवर उत्परास उन्मध्यमाः पितरः सोम्यासः।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु॥
इदं पितृभ्यो नमो अस्त्वद्य ये पूर्वासो य उपरास ईयुः।
ये पार्थिवे रजस्या निषत्ता ये वा नूनं सुवृजनासु विक्षु॥
आहं पितृन्त्सुवि-दत्रां अवित्सि नपातं च विक्रमणं च विष्णोः।
बर्हिषद् ये स्वधया भजन्त पित्वस्त इहागमिष्ठाः -॥
बर्हिषदः पितर ऊत्य १ र्वागिमा वो हव्या चकृमा जुषध्वम्।
त आ गतावसा शन्त-मेनाथा नः शं योररपो दधात॥
उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु।
त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु तेऽवन्त्वस्मान् -॥
आच्या जानु दक्षिणतो निषद्येमं यज्ञमभि गृणीत विश्वे।

मा हिंसिष्ट पितरः केन चिन्नो यद्व आगः पुरुषता कराम ॥
आसीनासो अरुणीना-मुपस्थे रयिं धत्त दाशौषे मर्त्याय ।
पुत्रेभ्यः पितर-स्तस्य वस्वः प्र यच्चत त इहोर्जं दधात ॥
ये नः पूर्वे पितरः सोम्यासोऽनूहिरे सोमपीथं वसिष्ठाः - ।
तेभियमः संरराणो हवींष्यु-शन्नुशद्भिः प्रति-काममत्तु ॥
ये तातृषुर्-देवत्रा जेहमाना होत्राविदः स्तोम-तष्टासो अर्कैः - ।
आग्ने याहि सुविदत्रे-भिरर्वाङ् सत्यैः कव्यैः पितृभिर्-घर्मसद्भिः ॥
ये सत्यासो हविरदो हविष्पा इन्द्रेण देवैः सरथं दधानाः ।
आग्ने याहि सहस्रं देववन्दैः परैः पूर्वैः पितृभिर्-घर्मसद्भिः ॥
अग्निष्वाताः पितर एह गच्छत सदः सदः सदत सुप्रणीतयः ।
अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्ववीरं दधातन ॥
त्वमग्न ईळितो जातवेदोऽवाड्ढव्यानि सुरभीणि कृत्वी ।
प्रादाः पितृभ्यः स्वधया ते अक्षन्नद्धि त्वं देव प्रयता हवींषि ॥
ये चेह पितरो ये च नेह याँश्च विद्म याँ उ च न प्रविद्म ।
त्वं वेत्थ यति ते जातवेदः स्वधाभिर्-यज्ञं सुकृतं जुषस्व ॥
ये अग्निदग्धा ये अनग्निदग्धा मध्ये दिवः स्वधया मादयन्ते ।
तेभिः स्वराळसु-नीतिमेतां यथावशं तन्वं कल्पयस्व ॥
ॐ शान्ति श्शान्ति श्शान्तिः ॥

## ५२ अघमर्षण सूक्तम्

॥ अघमर्षण सूक्तम् ॥

हिरण्य-शृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः ।

यन्मया भुक्तम-साधूनां पापेभ्यश्च प्रतिग्रहः ॥

यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम् ।

तन्न इन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनः पुनः ॥

नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः ॥

यदपां क्रूरं यद-मेध्यं यद-शान्तं तदप-गच्छतात् ॥ अत्याशना-दतीपानाद् यच्च

उग्रात् प्रतिग्रहात् ।

तन्मे वरुणो राजा पाणिना ह्यवमर्शतु ॥

सोऽहमपापो विरजो निर्मुक्तो मुक्त-किल्बिषः ।

नाकस्य पृष्ठ-मारुह्य गच्छेद्-ब्रह्मस-लोकताम् ॥

यश्चाप्सु वरुणः स पुनात्वघमर्षणः ॥

इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमग्ं सचता परुष्णिया ।

असिक्रिया मरुद्वृधे वितस्तयाऽऽर्जीकीये शृणुह्या सुषोमया ॥

ईतं च सत्यं चाभीद्धा-त्तपसोऽध्यजायत ।

ततो रात्रि-रजायत ततः समुद्रो अर्णवः ॥

समुद्रा-दर्णवा दधि संवत्सरो अजायत ।

अहोरात्राणि विदध-द्विश्वस्य भिषतो वशी ॥

सूर्या-चन्द्रमसौ धाता यथा-पुर्व-मकल्पयत् ।

दिवं च पृथिवीं चान्तरिक्ष-मथो सुवः ॥

यत्-पृथिव्याग्ं रजः स्वमान्तरिक्शे विरोदसी ।

इमाग्ग्-स्तदापो वरुणः पुना-त्वघमर्षणः ॥

पुनन्तु वसवः पुनातु वरुणः पुना-त्वघमर्षणः ।

एष भूतस्य मध्ये भुवनस्य गोप्ता ॥

एष पुण्य-कृतां लोकानेष मृत्योर्-हिरण्मयम् । द्यावा-पृथिव्योर्-हिरण्मयग्ं सग्ग्-श्रितग्ं सुवः ।

सनः सुवः सग्ं-शिशाधि ।

आर्द्रं ज्योतिर्-अहमस्मि ।

ज्योतिर्-ज्वलति ब्रह्मा-हमस्मि ॥

योऽहमस्मि ब्रह्मा-हमस्मि ।

अहमस्मि ब्रह्मा-हमस्मि ॥

अहमे-वाहं मां जुहोमि स्वाहा ।

अकार्यकार्य-वकीर्णी स्तेनो भ्रूणहा गुरु-तल्पगः ॥ वरुणोऽपामघमर्षण-स्तस्मात् पापत्-प्रमुच्यते ।

रजोभूमि-स्त्वमाग्ं रोदयस्व प्रददन्ति धीराः ॥

आक्रान्थ्-समुद्रः प्रथमे विधर्मञ्-जनयन्-प्रजा भुवनस्य राजा ।

वृषा पवित्रे अधिसानो अव्ये बृहथ्-सोमो वावृधे सुवान इन्दुः ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

## ५३ दुर्वा सूक्तम्

॥ दुर्वा सूक्तम् ॥

ॐ सहस्र-परमा देवी शतमूला शताङ्कुरा ।
सर्वं हरतु मे पापं दूर्वा दुस्स्वप्न नाशिनी ॥
काण्डात् काण्डात् प्ररोहन्ती परुषः परुषः परि ।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥
या शतेन प्रतनोषि सहस्रेण विरोहसि ।
तस्यास्ते देवी ष्टके विधेम हविषा वयं ॥
अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरा ।
शिरसा धारयिष्यामि रक्षस्व मां पदे पदे ॥

## ५४ पञ्च शान्तायः

॥ पञ्च शान्तायः ॥

ॐ शं नो मित्रः शं वरुणः । शं नो भवत्-वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णु-रुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मा-मवतु । तद्वक्तार-मवतु - अवतु माम् । अवतु वक्तारम् ।
ॐ शान्ति श्शान्ति श्शान्तिः ॥

ॐ शं नो मित्रः शं वरुणः । शं नो भवत्-वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णु-रुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव

प्रत्यक्षं ब्रह्मा-वादिषम्। ऋत-मवादिषम्। सत्य-मवादिषम्। तन्मा-मावीत्।
तद्वक्तार-मावीत्। आवीन्माम्। आवीद्-वक्तारम्।
ॐ शान्ति श्शान्ति श्शान्तिः॥
ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु।
मा विद्विषावहै॥ ॐ शान्तिः शान्तिः शान्तिः॥
ॐ नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो
वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्र-पतिभ्यो मामा-मृषयो मन्त्र-कृतो
मन्त्र-पतयः परादुर्मा ऽहमृषीन्-मन्त्र-कृतोमन्त्र-पतीन्-परादां वैश्वदेवीं वाच-
मुद्यासगं शिवा-मदस्तां जुष्टां देवेभ्यः शर्म मे द्यौः शर्म-पृथिवी शर्म विश्वमिदं
जगत्। शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्म-प्रजापती। भूतं वदिष्ये भुवनं वदिष्ये तेजो
वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिद-मुप-
स्तरण-मुपस्तृण उपस्तरणं मे प्रजायै पशूनां भूयादुप-स्तरण-महं प्रजायै पशूनां
भूयासं प्राणापानौ मृत्योर्-मापातं प्राणापानौ मा मा हासिष्टं मधु मैनिष्ये मधु
जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधु-मतीं देवेभ्यो वाच-मुद्यासगं शुश्रू-षेण्यां
मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु॥
ॐ शान्ति श्शान्ति श्शान्तिः॥
ॐ तच्छं योरा-वृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवीस्स्वस्तिरस्तु नः।
स्वस्तिर्-मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम्। शन्नो अस्तु द्विपदे। शं चतुष्पदे।
ॐ शान्ति श्शान्ति श्शान्तिः॥

॥ द्वादश शान्ति मन्त्राः ॥

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु ।
मा विद्विषावहै ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ शं नो मित्रः शं वरुणः । शं नो भवत्-वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो
विष्णु-रुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव
प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मा-मवतु ।
तद्वक्तार-मवतु - अवतु माम् । अवतु वक्तारम् ।

ॐ शान्ति श्शान्ति श्शान्तिः ॥

ॐ शं नो मित्रः शं वरुणः । शं नो भवत्-वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो
विष्णु-रुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव
प्रत्यक्षं ब्रह्मा-वादिषम् । ऋत-मवादिषम् । सत्य-मवादिषम् । तन्मा-मावीत् ।
तद्वक्तार-मावीत् । आवीन्माम् । आवीद्-वक्तारम् ।

ॐ शान्ति श्शान्ति श्शान्तिः ॥

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्ष-भिर्यजत्राः ॥ स्थिरैरङ्गै-स्तुष्टुवाँ-
सस्तनूभिः । व्यश्येम देवहितं यदायुः ॥ स्वस्ति न इन्द्रो वृद्ध-श्रवाः । स्वस्ति नः
पूषा विश्व-वेदाः ॥ स्वस्ति नस्ताक्ष्यो अरिष्ट-नेमिः । स्वस्ति नो बृहस्पतिर्-
दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः । ॐ ॥

ॐ नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः। नमो वाचे नमो वचस्पतये नमो विष्णवे बृहते करोमि॥

ॐ शान्ति श्शान्ति श्शान्तिः॥

ॐ यश्छन्दसा-मृषभो विश्वरूपः। छन्दोभ्योऽध्यमृता-थ्संबभूव।

स मेन्द्रो मेधया स्पृणोतु।

अमृतस्य देव-धारणो भूयासम्।

शरीरं मे विचर्षणम्।

जिह्वा मे मधु-मत्तमा।

कर्णाभ्यां भूरि-विश्रुवम्।

ब्रह्मणः कोशोऽसि मेधया पिहितः।

श्रुतं मे गोपाय।

ॐ शन्ति श्शन्ति श्शन्तिः॥ ॐ।

ॐ तच्छं योरा-वृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवीस्स्वस्तिरस्तु नः। स्वस्तिर्-मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम्। शन्नो अस्तु द्विपदे। शं चतुष्पदे।

ॐ शान्ति श्शान्ति श्शान्तिः॥

ॐ नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्र-पतिभ्यो मामा-मृषयो मन्त्र-कृतो मन्त्र-पतयः परादुर्मा ऽहमृषीन्-मन्त्र-कृतोमन्त्र-पतीन्-परादां वैश्वदेवीं वाच-मुद्यासग्ं शिवा-मदस्तां जुष्टां देवेभ्यः शर्म मे द्यौः शर्म-पृथिवी शर्म विश्वमिदं

जगत् । शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्म-प्रजापती । भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिद-मुप-स्तरण-मुपस्तृण उपस्तरणं मे प्रजायै पशूनां भूयादुप-स्तरण-महं प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्-मापातं प्राणापानौ मा मा हासिष्टं मधु मैनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधु-मतीं देवेभ्यो वाच-मुद्यासꣳ शुश्रू-षेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
मध्वीनः सन्त्वोषधीः - ॥
मधु-नक्त-मुतोषसि मधु-मत्पार्थिवꣳ रजः ।
मधु द्यौरस्तु नः पिता ॥
मधु-मन्नो वनस्पतिर्-मधुमाꣳ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

ॐ वान्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्टित-माविरा-वीर्म एधि वेदस्य म आणीस्थः श्रुतं मे मा प्रहासी-रनेन-धीते-नाहोरात्रान् संदधा-म्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मा-मवतु तद्-वक्तार-मवत्-ववतु माम्-अवतु वक्तारम्-अवतु वक्तारम् ।

ॐ शान्ति श्शान्ति श्शान्तिः ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्-पूर्णमुदच्यते ।

पूर्णस्य पूर्णमादाय पूर्णमे-वावाशिष्यते ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

ॐ इडा देवहूर्-मनुर्यज्ञनीर्-बृहस्पतिरुक्था-मदानि शगंसिष-द्विश्वेदेवाः सूक्त-वाचः पृथिवी-मातर्मा मा हिंगंसीर्-मधु मनिष्ये मधु जनिष्ये मधु वक्श्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासगं शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥ ॥

ॐ शान्ति श्शान्ति श्शान्तिः ॥

॥ गुरु समर्पणम् ॥

ॐ काले वर्षन्तु पर्जन्यः - पृथिवी सस्य-शालिनीः ।

देशोऽयं क्षोभर-हितः - ब्राह्मणाः सन्तु निर्भयाः ॥

अपुत्राः पुत्रिणः सन्तु - पुत्रिणः सन्तु पौत्रिणः ।

अधनाः सधनाः सन्तु - जीवन्तु शरदां शतं ॥

स्वस्ति प्रजाभ्यः परि-पालयन्तां

न्यायेन मार्गेण महीं महीशाः - ।

गोब्राह्मणेभ्यः शुभमस्तुनित्यं

लोकाः समस्ताः सुखिनो भवन्तु ॥

ऐंकार ह्रींकार रहस्य युक्त

श्रींकार कूधार्थ महाविभूत्याः ।

ॐकार मर्म प्रदिपानिभ्यां

नमो नमः श्री-गुरु-पादुकाभ्याम् ॥

आज्ञान-नाशनाय विद्महे ज्ञान-प्रकषाय धीमहि ।

तन्नो गुरु-पादुकाः प्रचोदयात् ॥

तत्-दक्षिणाय विद्महे गुरु-मूर्तये धीमहि । तन्न-शिवः प्रचोदयात् ॥

गण-नाथाय विद्महे अमृतकाय धीमहि ।

तन्नो धिशः प्रचोदयात् ॥

ॐ तत् सत् . ।

श्री दक्षिणा-मूर्त्यर्पनमस्तु ॥